सिंघी जैनशास्त्र शिक्षापीठ

सिंघी जैन ग्रन्थमाला-ग्रन्थांक ७५

आदि प्रधान संपादक : स्व. आचार्य जिनविजय मुनि

प्रधान संपादक : महामहोपाध्याय प्रा. जयन्तकृष्ण हरिकृष्ण दवे,
एम. ए., एल्एल्. बी : विद्यावाचस्पति

मानार्ह नियामक, भारतीय विद्या भवन

महाकवि श्री रामचन्द्रविरचित

रघुविलासनाटकम्

प्रास्ताविकम्

महामहोपाध्याय प्रा. जयन्तकृष्ण हरिकृष्ण दवे




भारतीय विद्या भवन, बम्बई-४०० ००७

१९८२]

[मूल्य रु. ४०

स्वर्गवासी साधुचरित श्रीमान् डालचन्दजी सिंघी



बाबू श्री बहादुरसिंहजी सिंघी के पुण्यश्लोक पिता

जन्म : वि. सं. १९२१, मार्ग. वदि ६ 卐 स्वर्गवास : वि. सं. १९८४, पौष सुदि ६

दानशील-साहित्यरसिक-संस्कृतिप्रिय

स्व. बाबू श्री बहादुरसिंहजी सिंघी



अजीमगंज-कलकत्ता

जन्म : ता. २८-६-१८८५]   [मृत्यु : ७-७-१९४४

SINGHI JAIN ŚĀSTRA ŚIKSĀPĪTHA
SINGHI JAIN SERIES—75

FOUNDER GENERAL EDITOR *Late* ACHĀRYA JINA VIJAYA MUNI

GENERAL EDITOR
Mahāmahopādhyāya Prof. JAYANTAKRISHNA HARIKRISHNA DAVE
M.A., LL.B., Vidyāvāchaspati.

Hon. Director, BHARATIYA VIDYA BHAVAN

RAGHUVILĀSANĀTAKAM
OF
MAHĀKAVI SHRI RAMACHANDRA

With a General Introduction
By
Mahāmahopādhyāya Prof. JAYANTAKRISHNA HARIKRISHNA DAVE



1982
BHARATIYA VIDYA BHAVAN
KULAPATI MUNSHI MARG
BOMBAY 400 007

First Edition — 1982

Price Rs. 40/-

PRINTED IN INDIA

By V. Varadarajan at Associated Advertisers & Printers, 505, Tardeo Arthur Road, Bombay-400 034, and Published by S. Ramakrishnan, Executive Secretary, Bharatiya Vidya Bhavan, Kulapati Munshi Marg, Bombay-400 007.

सिंघी जैनशास्त्र शिक्षापीठ

सिंघी जैन ग्रन्थमाला–ग्रन्थांक ७५

आदि प्रधान संपादक : **स्व. आचार्य जिनविजय मुनि**

प्रधान संपादक : **महामहोपाध्याय प्रा. जयन्तकृष्ण हरिकृष्ण दवे,**

एम.ए., एल्एल्. बी : विद्यावाचस्पति

मानार्ह नियामक, भारतीय विद्या भवन

महाकवि श्री रामचन्द्रविरचित

रघुविलासनाटकम्

प्रास्ताविकम्

महामहोपाध्याय प्रा. जयन्तकृष्ण हरिकृष्ण दवे



भारतीय विद्या भवन, बम्बई–४०० ००७

१९८२ | सर्वाधिकाराः सुरक्षिताः [मूल्य रु. ४०

GENERAL EDITOR'S INTRODUCTION

The Bharatiya Vidya Bhavan has so far published 53 volumes in the *Singhi Jain Series*. When late Muni Jinavijayaji had been to Santiniketan in 1931 December he had started the Singhi Jain Grantha-Mala with the very liberal financial assistance of late Shri Bahadursimhaji Singhi.[1] When the Bharatiya Vidya Bhavan was started in 1938, late Shri Muniji joined the Bhavan at the special invitation of late Shri Munshiji and entrusted the Singhi Jain Series to the Bhavan. Since then the Bhavan has brought out this series with meticulous care and this prestigious series has received respect of scholars and international recognition. Late Muniji remained its General Editor till his death which took place on June 3, 1976.

II

Muniji was born on January 27, 1888 A.D., at Rupaheli in Mewar in Rajasthan. His parents were Vriddhisimhaji and Rajkumari. They were Rajput farmers and Muniji's original name was Kisan Singh. At a young age he joined the Sect of a Baba, then a Marwari Jain monk and then ultimately was initiated by Muni Sundervijayaji and named Jinavijayaji. With keenness and industry he devoted himself entirely to exploring Bhandaras and manuscripts and reading, editing and making research. He went to Jaisalmer, Baroda, Bombay and Poona. Gandhiji invited him to Gujarat Vidyapith at Ahmedabad. He gave up the costume of a monk to pursue more vigorously his research plans. In 1928 he went to Germany at the invitation of Dr. Jacobi. Coming back to India, he had joined the Dandi March at Gandhiji's call. Thereafter, he joined Santiniketan at Gurudev Tagore's invitation and it was here as stated above in 1931 that this Singhi Series was started.

After Muniji joined the Bhavan, this series has become a very prestigious and integral part of the Bhavan. Even though he went to Jaipur as Director to serve his native place, the Singhi Series was purposely and continuously kept entrusted to the Bhavan by Muniji. In Jaipur he established a Research Institute and started another series. He then went to Chanderia near Chittor and started a Sarvodaya Sadhana Ashram. At Udsipur he laid foundation of Bhamasa Bharati Mandir and Shri Haribhadra Suri Smriti Mandir. He received the co-operation of a number of learned scholars and has edited more than a hundred rare works. He delivered Thakkar Vasanji Vyakhyanamala of the Bombay University,

1. Regarding the life of the founder of the Singhi Series, see the Prasasti by Muniji in Sanskrit in Kumarapalacharitra Sangraha and other volumes of this series.

2. Regarding Muniji's life, see his Sanskrit Prasasti in Kumarapalacharitra Sangraha and other volumes of this series as also the article by Pandit Sukhlaji in Darsan and Chintan, pp. 94 ff.

was awarded Padmasri by the Government of India, was made a member of the German Oriental Society and was the President of the Gujarat Itihasa Parishad.

He remained the Hon. Director of the Bhavan till 1954 when he formally retired to work more vigorously at Jaipur and thereafter I was asked to be the Hon. Director. As pointed out above he moved from place to place, from time to time and subsequently on account of age, failing health, and more particularly his failing eye-sight, the tempo of publication of the Singhi Series became slow, more particularly because he was keen to write exhaustive introduction to each publication himself. In spite of repeated requests from me, it was not possible for him to write these introductions in view of the aforesaid difficulties. However, the Bhavan was able to bring out 2 volumes in 1966 and 1967 by Dr. Upadhye and Tarunaprabhacharya's Shadavasyaka-balavabodhavritti edited by late Dr. Prabodh Bechardas Pandit in 1976. The last mentioned work contains in detail an exhaustive introduction by Muniji written at my repeated special request and gives the history of this Series. Even though it is named as Singhi Jain Series, Muniji has included in it many non-Jain works also. The Series has gained international recognition and is referred to as a prestigious publication in the Report of the Sanskrit Commission appointed by the Government of India.

III

Rāmachandra Suri, the author of *Raghuvilāsanatākam* and *Raghuvilāsanatakoddhara,* flourished during the reign of the Chālukya Kings Siddharāja Jayasimha and Kumārapāla of Gujarāt. He was born in S.Y. 1145, near about the capital Anahillapur Pātan. He was initiated as Muni in S.Y. 1150, became a Suri in S.Y. 1166 and expired in S.Y. 1230 at an advanced age of 85. He was the principal disciple of the famous Acharya Hemachandra Suri.[1] Another version says that he was born in S.Y. 1156.

The reign of Gujarat Chalukyas from the 11th to 13th centuries was a glorious and very prosperous period. Siddharaja had conquered Malwa. Scholars from many parts of India, including Kashmir, had come to the capital and found royal support. Even though Saivism was the faith of kings who called themselves Umapati-Labdha-Prasada, Jainism was equally favoured and royal grants were made available for both. There was religious tolerance.

Hemachandra Suri's place in the reign of Siddharaja was very high but in the reign of Kumarapala his relation with the ruler was that of Teacher and Disciple. He was born in the Modh Vanik Community in Dhandhuka on Kartik Purnima S.Y. 1145, came in contact with Deva-

1. Cf. Sanskrit Introduction by Pandit Lalchand Gandhi on Natya Darpana, Published by G.O.S.

chandra Suri at the age of five, was initiated at the age of eight and became Suri at the age of twentyone. His father was Chachcha — and from the use of the words "Mithya Vadin" and "Siva Nirmalya" used in connection with him,[2] Shri Rasiklal Parikh states that he might be a Maheshwari — but Hemachandra's mother Pahini and maternal uncle Nemi were Jains.

Hemachandra's original name was Changadeva, on initiation he was called Somachandra and on becoming a Suri he was called Hemachandra. He belonged to the Purnatalla-Gachchha. He came to Anahillapura Pattan when Siddharaja was ruling. His fame as a Saint and Scholar spread far and wide. Siddharaja invited him to his Court and his influence increased very much. After the conquest of Malwa, he composed the Siddhahema grammar at the desire of Siddharaja. Kumarapala came to Gadi at the age of 50. At Hemachandra's instance, he promulgated the Ordinance of "Amari" and prohibited the state from taking over the property on the death of a childless person. Kumarapala became "Parama-Arhat" Hemachandra composed new works on grammar, prosody, Dvyāsraya Kavya, on Alankara, Yogasastra, Tarka Sastra, Jinacharitas etc. He is compared with Mount Mandara churning the ocean of learning and rightly called Kali-Kala Sarvajna. His Vitaraja Stuti shows his breadth of vision and tolerance. List of his available works is given by Muni Punyavijayaji at pp. 82-3 of Shri Haima Saraswati Satra (G.S.P.). Mahatma Gandhi was another illustrious Modh Vanik and both Acharya Hemachandra Suri and he have preached Ahimsa in their own respective ways.

Kumarapala had a life full of ups and downs, of miseries and happiness and he had had many unpleasant and pleasant experiences. His life is described in detail by many Jain authors, giving the history of his family, birth, his life from childhood to death, how he acquired the kingdom, his administration, his views on religion etc. Hemachandra in the last five sargas of Sanskrit Dyasraya and in the eight sargas of Prakrit Dyasraya gives a poetic description of his life. In the Mahavira-Charitra of the Trishashti-Salaka-Purusha-Charitra, Kumarapala's description is given in the style of Bhavishya Purana. Maharajaparajaya drama of Yashpala describes how Kumarapala prohibited killing of animals, hunting, drinking and gambling. Kumarapala-Pratibodha of Somaprabha states how Hemachandra made Kumarapala pro-Jain.

Whether Kumarapala actually embraced Jainism or he merely adopted Jain ethics has been a subject of some controversy. That he was called Parama-Arhat and was highly indebted to and under the influence of Hemachandra is not doubted. Many Jain authors state that he actually took Jain Diksha. Prof. Rasiklal C. Parikh, in his introduction to Kavyanusasana p. 60, however states that if by conversion is meant that Kumarapala abjured the faith of his forefathers and gave up the worship

2. Prof. Rasiklal Parikh's Introduction to Kavyanushasana — P. 37.

of Siva and other Puranic deities, it is contradicted by historical evidence. In the last canto of Sanskrit Dyasraya Kavya, we find Kumarapala distinctly mentioning his devotion to Siva, and secondly in the inscription of Bhava Brihaspati of the year V.S. 1259 — A.D. 1173, the last year of Kumarapala's reign, he is called "Maheswara Nrpagrani", the foremost of Maheswara Kings. From these references it becomes clear that though Kumarapala's mode of life was changed, that though the old way of worshipping with animal sacrifice was also completely given up, he did not cease to be a worshipper of Siva-the God of his forefathers. As against this view, Muni Jinavijayaji in his article on Rajarshi Kumarapala (Bharatiya Vidya 1940 I iii pp. 221 ff) and his introduction to Kumarapala-pratibodha holds a different view and states that Kumarapala formally embraced Jainism.

Jainism and Saivism were then two established religions and in Gujarat there were many respectable families where both were honoured equally. Many of the Vaisya Caste followed both. Followers of both religions were at the helm of the affairs of the State. Rituals in both religions were done through Brahmins only. The Kuladevata of both was the same. But generally speaking, the Raja Dharma was Saivism. The Raja Purohitas were Nagara Brahmins. But Jain Scholars frequently contacted the Kings and the latter gave them the same respect as to their Gurus. Siddharaja, known for his inclination for Saivism, had also got constructed the Jain Temple for Adinatha called Raya Vihara. Kumarapala had great inclination towards Jain ethics and respected Hemachandra as his friend, guide and philosopher. Hemachandra had also very liberal views on Religion and Philosophy. A story goes that a woman got her husband, attached to a concubine, transformed into a bull. Afterwards, she repented and desired him to be retransformed into a man. God Siva was passing that way and suggested a herb in that locality as a cure. She could not identify the herb and so one after the other she picked up various herbs in that locality and ultimately found the real herb. Hemachandra recited this story to Kumarapala and advised that in this Kali age one may get benefit by respecting all Darsanas with due devotion (Kayanusasana Introduction p. 45). Hemachandra's prayer to Siva is well-known. "Whatever you are by name and in whatever time, if you are free from Dosha and Papa — you are the same Lord, Oh, Bhagavan — and I pay my Namaskaras to you." This was the liberal view of the time.

Among the main disciples of Hemachandra were Ramachandra, Gunachandra, Mahendra Suri, Vardhamanagani, Devachandra, Udayachandra, Yashaschandra and Balachandra.

This Ramachandra Suri was a Mahakavi and was the Pattadhara and principal disciple of Hemachandra Suri. On account of his poetic ability, Siddharaja had given him the title of "Kavi-Katara-Malla."

When Hemachandra was first introduced to Siddharaja, at that time Ramachandra was his pupil. Ramachandra was a swift composer of verses (Sighra Kavi). It is said that Siddharaja once asked him as to why the days are longer in Summer. Ramachandra replied: "The dust raised by your victorious horses has reached heavenly Ganges, mud is created there, green grass grows thereon, Sun's horses while travelling during the day stop to eat that grass. That is why days are longer in Summer." Siddharaja was pleased with this reply. Ramachandra's description of Anahilla Patan was also picturesque. His reply to Poet Visveswara is also frequently quoted: He was famous for Samasya-Purti. Siddharaja had asked Hemachandra as to who would be his successor and Hemachandra had mentioned Ramachandra.

Ramachandra is described as author of Prabhandha Sataka. Some people think that he had composed 100 works. But Muni Jinavijayaji has pointed out in Puratatva Volume II Page 421 that at one place there is a reference to one single work of Ramachandra called Prabandha Sata describing the 12 kinds of Rupakas and that work is of the length of 5,000 verses.

In his introduction to two dramas Ramachandra refers to Prabhandha Sataka. It appears that Prabhandha Sataka is the name of a single work. Ramachandra has in co-authorship with his co-student Gunachandra written two works, (1) Natyadarpana on the Science of Dramaturgy and (2) Dravyalankara on Nyaya. On both these works they have written their own Vritti. In Natyadarpana Ramachandra refers to 11 dramas which he has written. The number of times in which they are referred to in Natyadarpana is mentioned here in the bracket. (I) Kaumudi Mitrananda Prakaran (1) (II) Nalavilasa Nataka (13), (III) Nirbhaya Bhima Vyayoga (I), (IV) Mallika Makaranda Prakarana (I), (V) Yadavabhyudaya Nataka (8), (VI) Raghuvilasa Nataka (14), (VII) Raghavabhyudaya Nataka (7), (VIII) Rohini Mriganka Prakarana (2) (IX) Vanamala Nataka (1), (X) Satya Harischandra Nataka (7) and (XI) Yaduvilasa (mentioned in the introduction of Raghu Vilasa).

Out of the 11 dramas Nalavilasa is published by the Gaekwad Oriental Series. Kaumudi Mitrananda was published by Muni Punyavijayaji on the basis of a single manuscript in 1917 A.D. through Atmaram Sabha, Bhavnagar. Nirbhaya Bhima Vyayoga was published by Yaso Jain Granthamala and Satya Harischandra Nataka was published by the Nirnaya Sagar press, Bombay. Ramachandra describes himself as Vidya Trayichana, that is, expert in grammar, logic and poetics. He does not imitate others or plagiarise. He has frequently stated that he loves freedom and independence. It seems he had lost his right eye. It is stated that Hemachandra had asked him to become Ek Drishti that is to follow with single-mindedness Jainism and therefore he became one-eyed man. Another version says that he found mistakes in the poem of Sripala and thereafter he lost his eye-sight.

Dravyalankara, a work of logic contains three Prakasas. In Natya Darpana, he discusses 12 kinds of Rupakas namely, Nataka, Prakarana, Natika, Prakarani, Vyayoga, Samavakara, Bhana, Prahasana, Dima, Utsrishtikanka, Ihamriga and Vithi. In Natya Darpana he quotes from 63 works, out of which about 44 are dramas. This shows his vast reading and versatility. He has also referred to Svapna-Vasavadatta and Daridra Charudatta of Bhasa. He has also given extracts from Devi Chandra Gupta of Visakha Deva, the author of Mudrarakshasa. That drama is helpful in reconstructing the history of Chandragupta. In addition to this, he is the author of Kumara Vihar Sataka, Sudha Kalasa (An Anthology of Subhashita), Haima-Brihad-Vritti-Nyasa and several stotras. He is proud of his own poetry; he follows the Vaidarbhi style. His language is simple, sweet and full of prasada. The fact that he is the author of several dramas shows that at that time there was an appreciative audience for such dramas. He has taken material from folk lore, mythology, history etc. He has also brought in the element of miracle in his dramas. Among his contemporaries he stands out as one of the most celebrated author and poet. He is only next to his Guru, Hemachandra. About his death, Jain authors have given the following version: When Kumarapala became old, he first went to Hemachandra Suri, along with his Jain Minister Abhada to discuss as to who should succeed him as the next king. At that time, Ramachandra, Gunachandra, Balachandra, and other disciples were present. Hemachandra advised that Pratapamalla, the King's daughter's son, should succeed Kumarapala. While Minister Abhada suggested that Kumarapala's brother's son Ajaypala should succeed him. Balachandra was a friend of Ajaypala. He broke the confidence of his Guru and conveyed to Ajaypala that he was not favoured by Hemachandra. After some time, Hemachandra died. Ramachandra consoled Kumarapala who was sorry on account of Hemachandra's death. It is said that Ajaypala poisoned Kumarapala and came to Gadi. It is also further said that thereafter he took vengeance on Ramachandra who had sided with Hemachandra. It is said that he was made to sit on a heated Iron or Copper Seat and thereby his death was caused. According to another version, Ramachandra composed Dodhaka Panchasati, while crushing his tongue by his teeth and died.

Gunachandra was another disciple of Hemachandra. He is the co-author with Ramachandra of Dravyalankar and Natyadarpana. Ramachandra was more versatile while Gunachandra preferred only serious subjects. Mahendra Suri was another disciple and he wrote Anekartha Kairavakara Kaumudi which is a commentary on Hemachandra's work and he wrote it in the name of Hemachandra. Another disciple Vardhamana Gani wrote a commentary of Kumara Vihara Prasasti. Devachandra wrote a drama called Chandralekha Vijaya Prakarana. Udayachandra and Yasaschandra were other disciples of Hemachandra. Balachandra who broke the confidence of his Guru, is said to be responsible for Rama-

chandra's death and he subsequently went away to Malwa. He is stated to be the author of Snatasya, a well known Stuti.

Gujarat's contribution to Sanskrit literature is not meagre. Kapila Muni is stated to have flourished near Siddhapur. Nakulisa of Pasupata Darsana is said to belong to Karavan (Kayavaroha) near Vadodara. Nyaya and Vaiseshika Darsanas too are inclined to Saivism and said to belong to Gujarat. Devardhi Gani made the Jain canon recorded in book form at Vallabhipur. In that city, there were 18 sub-schools of Hinayana Budhism and the famous Budhist Saints Gunamati and Sthiramati also flourished here. Samba Panchasika is stated to have been composed by Lord Krishna's son Samba. Magha flourished in Bhimamala in the 7th Century. Dhaneswar's Satrunjaya Mahatmya and Bhatti's Ravanavadha also belong to this age. Bappabhatti and Siddharshi are other known authors. Vajrata and Uvvata were vedic scholars of Patan and Vadnagar. Dwadviveda and Vishnu were other well-known scholars. In the eleventh century came Hemachandra and his band of scholars. Vagbhata wrote Vagbhatalankar. Someswara, the Nagara poet of repute wrote Kirtikamudi, Surathtotsava and Ullagharaghava. Nanaka, Subhata, Arisimha, Amarachandra Suri, Vastupala, Prahladana-deva, Manikyachandra, Mallishena Suri the author of Syadvada Manjari, Achala Dwivedi the author of Nirnaya Dipaka, Devavimalagani, Yasovijayaji, Vijayalakshmi Suri — these are some of the prominent names of authors who have contributed significantly to Sanskrit literature and philosophy. (See Gujaratnu Sanskrit Sahitya: By Dr. A. B. Dhruva).

The first known Sanskrit drama of Gujarat is Karna Sundari of Poet Bilhana. This Karna Sundari is none but Mayanalla, the mother of Siddharaja. Yasaschandra wrote 2 dramas — one Mudita Kumudachandra and the other Rajimatiprabodha. But the foremost author of dramas of this time was our author under review Ramachandra Suri who wrote eleven dramas mentioned above. Another disciple of Hemachandra called Devachandra wrote Chandralekha. Vijayapala is the author of Draupadi-Swayamvara. Another Jain author called Ramabhadra wrote Prabhuddha-Rauhineya. Balachandra in 1221 A.D. wrote Karuna-Vajrayudha and poet Someswara wrote Ullagha-Raghava. Jayasimha Suri is the author of Hammiramada Mardana. Gangadhara in the 15th century wrote Gangadasa Pratapavilasa. Bhudeva Sukla's Dharmavijaya, Ravidasa's Pakhandakhandana, Ramakrishna Devaji's Gopalakelichandrika and Jagannatha's Bhagyamahodaya are some of the other dramas. In the 19th Century, Mahamahopaddhyaya Sankaralal wrote a number of Sanskrit dramas. Thus, from the 10th Century onwards, Gujarat has contributed more than 30 dramas out of which Ramachandra Suri alone has written 11 dramas. (For further details, see the article of Dr. Bhogilal J. Sandesara in Bharatiya Vidya 1940, I iii P.304 ff.)

As stated before, Natyadarpana is composed by two authors — Ramachandra and Gunachandra. They have written their own Vivritti or ex-

planatory notes. In all there are 207 Karikas. It mainly relies on the Natya Sastra of Bharata Muni but the sphere of Natyadarpana is very much limited. The Natyasastra of Bharata in its 18th chapter, describes 10 Rupakas. Before Ramachandra, Dhananjaya had written a work on the ten Rupakas. The present work of Ramachandra, a protege of the Gujarat King, wrote this work Natyadarpana in competition with the work of Dhananjaya who was a Pandit in the court of the King of Malwa. There was at that time a keen rivalry between Malwa and Gujarat. Ramachandra refers to Dhananjaya about 13 times and has criticised him about 2 times. In several other definitions also, Ramachandra differs from Dhananjaya. Ramachandra also seems to have been acquainted with the work of Sagaranandi called Nataka-Lakshana-Ratnakosa and differs from him also at several places. At one place Ramachandra differs from Mammata also. In the matter of Rasa, he mainly relies on Abhinavagupta. Ramachandra has divided Rasas into 2 parts — some like Sringara etc. are Sukhatmaka while others like Karuna etc. are Duhkhatmaka.

Dhananjaya, being a Vaishnava, describes ten varieties of Rupaka, connecting them with the ten Avataras of God Vishnu. Similarly, Ramachandra Suri, being a Jain, intends to connect the 12 varieties of Rupaka with the 12 Angas of the Sacred Jain Scriptures. The work of Ramachandra is divided into 4 parts, each one called a Viveka. In the first part, only the Nataka is discussed. In the second, the remaining eleven varieties of Rupaka are discussed. In the third Vritti, Rasa etc. are delineated and the fourth part discusses certain general topics connected with Rupakas. Ramachandra has not only discussed Nataka variety of Rupaka fully but has also given detailed discussions of other varieties. His illustrations are also numerous. He has taken them from 63 works out of which eleven dramas are written by Ramachandra himself, Kalidasa, Bhavabhuti, Bhasa, Visakhadatta, Sriharsha and others are frequently quoted. Devichandragupta of Visakhadatta is helpful in reconstructing the history of the Guptas — a question arises whether Chandragupta married the widow of his brother Ramagupta. Bhasa's Swapna Vasavadatta and Charudatta dramas are also referred to (Charudatta is referred to as Daridracharudatta) but the verse quoted as from Swapna Vasavadatta is not found in the presently available text.

Raghuvilasa, his own drama, is described by Ramachandra as one of his four best dramas. Others of the best four are Raghavabhyudaya, Yadavabhyudaya and Nalavilasa.

Raghuvilasa is a Nataka while Kaumudi Mitrananda is a Prakarana

Nataka is defined by Ramachandra as follows. It secures for us all the three Purusharthas viz. Dharma, Artha and Kama. In it, there are Ankas, Upaya, Dasa and Sandhi. Gods are helpful to the hero. It describes the life incidents of famous ancient kings. The hero is either Dhiroddhata or Dhirodatta, or Dhiralalita or Dhiraprasanta.

In Nataka, the main story is famous in history but in Prakarana, the story is imaginary. In Nataka, the hero is some famous ancient king but in Prakarana, the hero is the creation of the author's imagination. In Prakarana, the hero is either a Vanik, or a Vipra or a Sachiva. Sachiva means one who looks after the affairs of the State. Thus, the hero here can be either a minister or even the commander of the Army. In Prakarana, divine beings do not come on the stage. The hero suffers from many difficulties. The heroine is of middle-class family. There are Dasas, merchants, and Vitas also in Prakarana. Ramachandra gives seven varieties of Prakarana.

BHARATIYA VIDYA BHAVAN
Bombay-400 007

October 8, 1981

JAYANTAKRISHNA H. DAVE
Hon. Director, Bharatiya Vidya Bhavan
and
General Editor, Singhi Jain Series

॥ अर्हम् ॥

महाकविश्रीरामचन्द्रसूरिरचितं

रघुविलासनाटकम् ।

[प्रथमोऽङ्कः]

सतीं यः केवलां दृष्टिं हृतामत्युग्रकर्मणा ।
तीर्त्वा मोहाब्धिमानैषीद् वीरायास्मै नमो नमः ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः— (सप्रमोदम्)

सीतां काननतो जहार विहितव्याजः पुरा रावण-
स्तं व्यापाद्य रणेषु तां पुनरथो रामः समानीतवान् ।
एतस्मै कविसूक्तिमौक्तिकमणिस्वात्यम्भसे भूर्भुवः-
स्वर्यामोहनकार्मणाय सुकथारत्नाय नित्यं नमः ॥ २ ॥

भवतु तावत् । अहं सामाजिकादेशमनुतिष्ठामि । (इति परिक्रामति ।)

(प्रविश्य)

चन्द्रकः—भाव ! कथं विस्मयाङ्कुरितरोमाञ्चकोरकदन्तुरो विलोक्यसे ? ।

सूत्रधारः—मारिष ! समाजलोकस्य प्रबन्धरामणीयकविशेषपरिज्ञानचातुरीसम्पदा चमत्कृतोऽस्मि ।

चन्द्रकः—भाव ! समिद्धरसानुबन्धे कुत्र प्रबन्धे समलङ्कृतसम्पदां सभासदां सादरं चेतः ? ।

सूत्रधारः—मारिष ! श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनविधानवेधसः श्रीमदाचार्यहेमचन्द्रस्य शिष्यं रामचन्द्रमभिजानासि ? ।

चन्द्रकः—(साक्षेपम्)

पञ्चप्रबन्धमिषपञ्चमुखानकेन
विद्वन्मनःसदसि नृत्यति यस्य कीर्तिः ।
विद्यात्रयीचणमचुम्बितकाव्यतन्द्रं
कस्तं न वेद सुकृती किल रामचन्द्रम् ? ॥ ३ ॥

किन्तु द्रव्यालङ्कारनामा प्रबन्धोऽनभिनेयत्वेन तावदास्ताम्। अपरेषां राघवाभ्युदय-यादवाभ्युदय-नलविलास-रघुविलासानां चतुर्णां रमणीयतमसन्ध्यङ्गनिवेशानां विशदप्रकृतीनां पुनर्मध्ये कुत्र प्रजानामनुरागः ?।

(नेपथ्ये)

प्रजानां प्रथमे, कैकेय्याः पुनर्द्वितीये।

सूत्रधारः—(सरोषम्) कोऽयमावयोरन्तराले प्रलपति ?।

चन्द्रकः—कृतममुष्य वातकिनः प्रलापेषु संरम्भेण। प्रस्तुतमभिधीयताम्।

सूत्रधारः—प्रजानां रघुविलासनामनि चतुर्थे प्रबन्धेऽनुरागः।

चन्द्रकः—रामचन्द्रसूक्तेषु कमसाधारणं गुणं सम्भावयति भावः ?।

सूत्रधारः—

व्युत्पत्तिर्मुखमेव नाटकगुणन्यासे तु किं वर्ण्यते ?,
सौरभ्यप्रसवा नवा भणितिरप्यस्त्येव काचित् क्वचित्।
यं प्राणान् दशरूपकस्य सकरोत्क्षेपं समाचक्षति,
साहित्योपनिषद्विदः स तु रसो रामस्य वाचां परम् ॥ ४ ॥

अपि च—

रामात् पूर्वं मधुरा व्यक्तं वाचो वपुष्मतां नाऽऽसन्।
कथमन्यथा सुधार्थं ममन्थुरमृतान्धसः सिन्धुम् ? ॥ ५ ॥

(नेपथ्ये)

अत्यल्पमभिदधासि। नय-विनय-क्रम-विक्रमादयोऽपि महापुरुषगुणा रामात् पूर्वं वपुष्मतां नाऽऽसन्।

सूत्रधारः—(सरोषम्) मारिष! कोऽयं पुनः पुनरस्मानन्तरयति ?।

चन्द्रकः—ननु कथितं वातकी कोऽप्येषः। (पुनर्विमृश्य) भाव! अमी कृतज्ञविज्ञचूडामणयः सभासदो भवदीयस्य नाट्यकलाकौशलस्य पात्रम्, नापरे।

सूत्रधारः—मारिष! हृद्यङ्गममभिदधासि। यतः—

उच्चरणलब्धकीर्त्तेराज्ञारहितस्य लक्षणयुतस्य।
रामस्य वनं शरणं जितपरकलभस्य शरभस्य ॥ ६ ॥

(नेपथ्ये)

आः क्रूरनटखेट! किमिदं राज्याभिषेकपर्वणि रामस्य वनप्रस्थानमावेदयसि ?।

सूत्रधारः—(विलोक्य) कथमयं गन्धर्वैकभूमिकावाही कुशीलवः पुनः पुनरस्मानन्तरितवान् ?। तदेहि मारिष!, करणीयान्तरमनुतिष्ठामः।

(इति निष्क्रान्तौ)

॥ प्रस्तावना ॥

(ततः प्रविशति कञ्चुकी गन्धर्वकः ।)

गन्धर्वकः–यथा किल मया कोपकडारचक्षुः साक्षेपया मन्थरया दत्तहस्तावलम्बा राजानमुपसर्पन्ती देवी कैकेयी विलोकिता तथा जाने सप्रत्यूहो रामस्य राज्याभिषेकः । भवतु तावत् । कौशल्यादेशेन गन्धर्वलोकं सङ्गीतकाय प्रवर्त्तयामि । कः पुनरस्मिन् राज्याभिषेकमङ्गले ऋतुः समुचितो गातुम् ? । (विमृश्य) हुं ज्ञातम् । वसन्तः । तथा हि–

ऋतुषु वसन्तः करणेषु लोचनं कामिनी च विषयेषु ।
दयितेषु जीवितव्यं विद्या च कलासु खलु सारम् ॥ ७ ॥

(उच्चैःस्वरम्) हंहो गन्धर्वलोकाः ! स्वयं देवी वः कौशल्या समादिशति–रामचन्द्रराज्याभिषेकपर्वणि वसन्तमधिकृत्य गीयताम् ।

(नेपथ्ये)

अलमलं सङ्गीतकेन ।

गन्धर्वकः–कथमयं दुर्मुखो व्याहरति ? ।

(प्रविश्य)

दुर्मुखः–अलमलं सङ्गीतकेन ।

गन्धर्वकः–(सरोषम्) अरे ! किमर्थं कौशल्यादेशमन्तरयसि ? ।

दुर्मुखः–किं मां पृच्छसि ? । गत्वा पृच्छ रघुकुलयशःशशाङ्ककादम्बिनीं देवीं केकयनन्दिनीम् ।

गन्धर्वकः–(सभयम्) विततमावेदय ।

दुर्मुखः–कौशल्या-सुमित्रयोराकारणाय सुबुद्धिना सत्वरं प्रेषितोऽस्मीति नावसरो विततावेदनस्य । (इत्यभिधाय निष्क्रान्तः ।)

(ततः प्रविशति सम्भ्रान्ता कौशल्या सुमित्रा च ।)

सुमित्रा–[1]तदो तदो ? ।

कौशल्या–[2]अणंतरं पत्तकं निरूवयंतो य्येव अज्जउत्तो मुच्छाए सिंहासणादो निवडिदो ।

सुमित्रा–(सखेदम्) [3]हदा तुमं केगइ ! हदा तादिसस्स अज्जउत्तपसादस्स । एदं ते समुचिदं ? ।

१) ततस्ततः ? । २) अनन्तरं पत्रकं निरूपयन्नेव आर्यपुत्रः मूर्च्छया सिंहासनात् पतितः । ३) हता त्वं कैकयि ! हता तादृशस्य आर्यपुत्रप्रसादस्य । एतत् ते समुचितम् ? ।

(गन्धर्वकः प्रणमति ।)

कौशल्या – (सास्रम्) **गन्धव्वय! पिच्छ केगेईए कीदिसं कदं?।**[1]

गन्धर्वकः – (ससम्भ्रमम्) **देवि! कैकेयी किं कृतवती?।**

कौशल्या – **एदं पच्छा कहिस्सं। संपदं दाव दंसेहि मग्गं, जेण जीविदसेसं अज्जउत्तं संभावयामि।**[2]

(सर्वे सत्वरं परिक्रामन्ति ।)

(ततः प्रविशति मूर्च्छितो राजा दशरथः सुबुद्धिप्रभृतिकश्च परिवारः ।)

सुबुद्धिः – (सखेदमुच्चैःस्वरम्)

न्याय! स्थानमुपैहि किञ्चिदपरं, सौजन्य! पुण्यक्षयो
जात[स्ते, गुरुते! हताऽसि, विनय! प्राप्तोऽसि दीनां दशाम्।[3]
आधारो भवतामयं दशरथक्षोणीधरो दैवतः,
कैकेयीकुलिशेन हन्त! पतता निर्मूलमुन्मूल्यते ॥ ८ ॥

. . . .

सुमित्रा –] **अज्जउत्त! जाव तुमं अखंडिदसच्चव्वओ अक्खयसरीरो अ चिरं रज्जं पालेसि ताव कधं मे मणोरहरहो भज्जदि?।**[4]

सुबुद्धिः – **साधु देवि! पतिव्रते! साधु।**

सुमित्रा – **अज्जउत्त! केगेई किं विन्नवेदि ?।**[5]

दशरथः – **येन रघुकुलयशः कलङ्क्यते तद् विज्ञपयति।**

सुमित्रा – **तहा वि किं?।**[6]

राजा – **इदं विज्ञपयति?।** (सबाष्पं पत्रमर्पयति ।)

(सुमित्रा वाचयति ।)

जइ सच्चं सच्चरई वरेण भरहस्स तो सिरिं देहि।[7]
सोलस वरिसाणि तहा वणवासं रामभद्दस्स ॥ ९ ॥

---

१) गन्धर्वक ! पश्य कैकेय्या कीदृशं कृतम् ? । २) एतत् पश्चात् कथयिष्यामि । साम्प्रतं तावद् दर्शय मार्गम्, येन जीवितशेषं आर्यपुत्रं सम्भावयामि । ३) एतदन्तरे तालपत्रीयप्रतिसत्कं सप्तमं पत्रं त्रुटितमिति उद्धारानुसारेणात्रानुसन्धितम् । ४) आर्यपुत्र ! यावत् त्वं अखण्डितसत्यव्रतः अक्षतशरीरश्च चिरं राज्यं पालयसि तावत् कथं मे मनोरथरथः भज्यते ? । ५) आर्यपुत्र ! कैकेयी किं विज्ञपयति ? । ६) तथापि किम् ? ।

७) यदि सत्यं सत्यरतिः वरेण भरतस्य ततः श्रियं देहि ।
षोडश वर्षाणि तथा वनवासं रामभद्रस्य ॥ ९ ॥

८) पुणो उ० ।

(कौशल्या प्रविशति ।)

कौशल्या – इत्तिके[1] वि अत्थे कीस अज्जउत्तो खेयमुव्वहदि ? । रामभद्दभरहाणं को णाम विसेसो ? ।

सुबुद्धिः – (सप्रमोदं प्रणम्य) साधु देवि ! कोशलकुलनभस्तलचन्द्रिके ! साधु । पतिव्रतानामेष एव वचोविलासः ।

राजा – अमात्य !

न रामस्तैः स्तुत्यैर्नियतमभिरामः सुतगुणै-
रुताहो ! व्यक्तं मे विशदगुणगृह्यं न हृदयम् ।
तदेतत्[2] कैकेयीवचनमुपकर्ण्यापि यदहं,
मरुन्मैत्रीहार्यैर्न तनुतनुखण्डैर्विदलितः ॥ १० ॥

कौशल्या – पडिहदममंगलं[3] ।

सुबुद्धिः – किमिदममङ्गलाभिधानम् ? ।

राजा – (सखेदम्) अमात्य ! अतः परममङ्गलानि भूयांसि रघुकुले भविष्यन्ति । (पुनः विमृश्य)

इतः सत्योच्छेदो रघुकुलकलङ्कप्रथमभूः,
सुतस्य श्लाघ्यस्य प्रवसनमितोऽकीर्त्तिपटहः ।
अकाण्डे तत् किञ्चित् प्रभवति विधेयं विधिवशाद्,
न चाऽऽदातुं हातुं न च यदिह शक्यं कथमपि ॥ ११ ॥

(पुनः सुबुद्धिं प्रति) अमात्य ! किमिदानीमाचरामि ? ।

सुबुद्धिः – अस्मिन्नर्थे देव एव कृत्या-ऽकृत्यविदुरः, न पुनरस्मादृशः कश्मलदृशः ।

राजा – देवि ! किमिदानीं दशरथस्य कृत्यम् ? ।

कौशल्या – रामभद्दवणपव्वासणं[4] ।

राजा – यद्ययमर्थो देव्या[5] अपि सम्मतस्तदानीम् —

निस्त्रिंशते ! भव पुरो, व्रज साधुवाद !,
दाक्षिण्य ! मुञ्च, विरम प्रियवादगर्व ! ।
जिह्वे ! यतस्व निरवद्यचरित्रपात्रं,
पुत्रं प्रवासयितुमेष विधेर्नियोगः ॥ १२ ॥

---

१) इयत्यपि अर्थे कस्माद् आर्यपुत्रः खेदमुद्वहति ? । रामभद्रभरतयोः को नाम विशेषः ? । २) यदेतत् उ० । ३) प्रतिहतममङ्गलम् । ४) रामभद्रवनप्रवासनम् । ५) देव्याऽपि उ० ।

कोऽत्र भोः ! ? (इत्यर्द्धोक्ते मूर्च्छति ।)

(सर्वे सपूत्कारं चन्दनाद्यैरासिञ्चन्ति ।)

राजा – (चेतनामास्थाय सगद्गदस्वरम्) **गन्धर्वक !** ।

गन्धर्वकः – आदिशतु देवः ।

राजा – (पुनः सबाष्पम्) **गन्धर्वक !** ।

गन्धर्वकः – एषोऽस्मि । कृत्यमादिशतु देवः ।

(राजा गन्धर्वकस्य कर्णे एवमेव ।)

(गन्धर्वकः मन्दमन्दं[1] रुदन् निष्क्रान्तः ।)

राजा – (सबाष्पम्) अमात्य !

ऋते सप्ताम्भोधिप्लवनविधुरं[2] कल्पदहनाद् ,
विना नानाप्रेङ्खत्प्रलयपवमानव्यतिकरैः[3] ।
क्षिपन् वत्सं रामं वनभुवि हतोऽयं दशरथो,
रघूणां पन्थानं न चरति न च प्राकृतनृणाम् ॥ १३ ॥

सुबुद्धिः – किमिदमादिश्यते देवेन ? । सत्यव्रताचरणं न किं रघूणां पन्थाः ? ।

राजा – (क्षणमधोमुखो भूत्वा) अमात्य !

स्त्रीवाग्भिर्व्यपसार्य राज्यसमयान्निर्दोषमूर्जस्वलं
पुत्रं ज्येष्ठमपास्तवान् दशरथः कान्तारवारांनिधौ ।
विश्वेषां जगतां स्तुतेः पदमसौ तत्रापि रामो हहा !,
केयं शाश्वतिकी प्रशस्तिरयशःप्रारोहभूमिर्व्यभूत् ? ॥ १४ ॥

सुबुद्धिः – देव ! कोऽयं विचारविपर्यासः ? । ननु सत्यव्रताचरणमनश्वरी यशः-प्रारोहभूमिः प्रशस्तिः ।

राजा – (सखेदम्) सत्यं विचारविपर्यासो मे, कथमपरथा वत्सं रामभद्रं वनाय प्रस्थापयामि ? । (पुनः सरोषमिव) अमात्य ! लोक एव मामतः परमुपहसितुं प्रगल्भिष्यते, त्वं किमर्थमुपहससि ? ।

(सुबुद्धिः सभयमधोमुखो भवति ।)

कौशल्या – अय्यउत्त[4] ! पसंसणिज्जे कम्मणि को एस विसायपिसाओ ? ।

राजा – (सखेदम्) देवि ! त्वमपि विप्लावयसि ।

(कौशल्या सभयमास्ते ।)

---

१) मन्दं मन्दं उ० । २) °म्भोधेः प्लव° उ० । ३) °करम् उ० । ४) आर्यपुत्र ! प्रशंसनीये कर्मणि क एष विषादपिशाचः ? ।

राजा - (सखेदम्)

आः प्राणाः ! पुरतोऽप्यमुं दशरथं यूयं ध्रुवं हास्यथ,
व्यातेने भुवनेऽत्र को नु पुरुषो ब्रूत स्थिरायुः स्थितिम् ? ।
तद् वत्सस्य गुणाम्बुधेर्वनमनु प्रस्थानवार्त्ताश्रुतेः
पूर्वं चेद् विजहीथ हन्त ! भवति श्रेयस्तरं *वस्तदा ॥ १५ ॥

(नेपथ्ये)

सत्यं रघूद्वहपतेर्भरतस्य राज्यं,
मातुश्च केकयभुवः [1]परमः प्रमोदः ।
मां काननाय दिशता [2]जगतां हितेन,
तातेन कर्म किमु नाथ कृतं यशस्यम् ? ॥ १६ ॥

राजा - अमात्य ! कोऽयमस्मानुपहसति ? ।

सुबुद्धिः - (स्वरेण प्रत्यभिज्ञाय) देव ! रामभद्रकुमारो राजानमुपस्तौति ।

राजा - (सखेदमुच्चैःस्वरम्) आः कुलीनावतंस वत्स रामभद्र ! किं मां मर्मणि स्पृशसि ? । (आत्मानं पर्यङ्के पातयति ।)

(प्रविश्य)

प्रतीहारः - विहितवनप्रवासनेपथ्यः सीता-लक्ष्मणाभ्यां सह रामभद्रकुमारो देवपादान् द्रष्टुमुत्कण्ठते ।

(राजा तूष्णीमास्ते ।)

(नेपथ्ये)

श्रियं यः सन्त्यज्य श्रयति वनवासं पितृगिरा,
स रामो वा लोकस्तवनवचसामस्तु विषयः ।
सुमित्रापुत्रो वा गुरुजननिदेशादपि विना
निसर्गप्रीत्यैव व्रजति मुदितो राममनु यः ॥ १७ ॥

सुमित्रा - (कौशल्यां प्रति) [3]पियसहि ! वत्सलक्खणेण जेट्ठभायरमणुसरंतेण पसंसणीया कदम्हि लोयाणं ।

राजा - अमात्य !

वैमात्रेयोऽप्यकृत तदयं लक्ष्मणो रामभद्रे,
काकुत्स्थानां कुलमपतुलं येन जातं जगत्सु ।

* वः सदा उ० । १) परमप्रमोदम् उ० । २) जगतीहितेन उ० । ३) प्रियसखि ! वत्सलक्ष्मणेन ज्येष्ठभ्रातरमनुसरता प्रशंसनीया कृताऽस्मि लोकानाम् (लोकैरित्यर्थः) ।

ख्यातस्तातोऽप्यथ दशरथः किञ्चिदेतद् व्यधत्त,
व्यक्तं तस्मादजनि महतां सोऽपि पन्थाः कलङ्की ॥ १८ ॥

सुबुद्धिः – देव ! सत्यव्रताचरणपवित्रिते कर्मणि कोऽयं विषादनिषादप्रवेशः ? ।

राजा – (साक्षेपम्) रामभद्रप्रवासनाकालुष्यकश्मले कर्मणि कथमनुचितो विषादप्रवेशः ? ।

प्रतीहारः – विहितप्रवासनेपथ्यो रामभद्रकुमारो देवपादान् द्रष्टुमभिलषति ।

सुबुद्धिः – रामभद्रप्रवेशमादिशतु प्रतीहाराय देवः ।

(राजा सदुःखमधोमुखं तिष्ठति ।)

कौशल्या – [1]अज्जउत्त ! पविसदु वत्सो । पिच्छदु पिउणो पादे ।

सुमित्रा – [2]अज्जउत्त ! अणुजाणेहि वत्सं, जेण पिउणो पाए पिच्छदि ।

राजा – (साक्षेपम्)

यत् (यः) पूर्वं शतशो ममांह्रियुगलीमाबाल्यतो दृष्टवान्,
भक्त्या तस्य बभूव देवि ! विपिने तावन्निवासः फलम् ।
तां सम्प्रत्यपि वीक्षितुं गुरुतरोत्कण्ठाव्यथाव्याकुलो
वत्सः कां पुनरप्ययं स्पृहयति श्रेयस्तमां सम्पदम् ? ॥ १९ ॥

कौशल्या – [3]अज्जउत्त ! को एस पुणो पुणो अत्तणो विसायकिलेसो ? ।

प्रतीहारः – देव ! रामभद्रः कुमारो [[4]..............................

राजा – (साक्षेपम्)

नाऽकीर्त्तिर्गणिता, श्रिता न सरणिर्लोकस्य, वृत्तं सतां
न ध्यातं, गुणशालिनो हृदि धृतं पुत्रस्य न प्रेम च ।
चण्डालाचरणाश्रिते विरचिते कर्मण्यधर्माविले
वक्त्रं दर्शयितुं न मे समुचितं द्रष्टुं न रामस्य च ॥ २० ॥

अलं श्रुत्वा वाचं सपदि मम वत्सेन कलुषा-
मरण्यानीं व्यालव्यसनशतकीर्णां प्रवसता ।
न नामाद्दश्यास्यः परमहमभाग्योऽपि महतां,
तदास्तामास्तां मे वदनमपटीच्छादितमपि ॥ २१ ॥

.........]था समनुसर विपिनम् । शिवास्ते पन्थानः । दृष्टा एव शतशो वयम् । कृतमिदानीमस्मद्दर्शनेन ।

---

१) आर्यपुत्र ! प्रविशतु वत्सः । पश्यतु पितुः पादौ । २) आर्यपुत्र ! अनुजानीहि वत्सम्, येन पितुः पादौ पश्यति । ३) आर्यपुत्र ! क एष पुनः पुनः आत्मनः विषादक्लेशः ? । ४) अत्र तालपत्रीय-प्रतिसत्के १५–१६ पत्रे त्रुटिते वर्त्तेते इति खण्डितांशस्थाने उद्धारगतोंऽशोऽत्रोद्धृतोऽस्ति ।

प्रतीहारः – यदादिशति देवः । (इत्यभिधाय निष्क्रान्तः ।)

(नेपथ्ये)

रजनीचरेण तमसा तप्तारामस्य देवरिपुजयिनः ।
ह्रियते विलापतुमुला विधुवदनाऽऽशावधूरधुना ॥ २२ ॥

सूत्रधारः – (सभयमात्मगतम्) कथमयं मागधः सन्ध्यावर्णनव्याजेन मूर्च्छितायाः निष्प्रत्याशायाः रामप्रियायाः निशाचरेणापहारं सूचयति ? । भवतु तावत् । (प्रकाशम्) देव ! सन्ध्याविधिसमयो वर्त्तते ।

राजा – देव्यौ ! प्रतिव्रजत यूयम् । पश्यत पुत्रयोः प्रवसतोर्मुखकमलम् । अमात्य ! भरतराज्यसामग्रीकरणाय व्रज । वयमपि सन्ध्याविधिमाधातुं व्रजामः ।

(इति सर्वे निष्क्रान्ताः ।)

॥ प्रथमोऽङ्कः ॥



[द्वितीयोऽङ्कः ।]

(ततः प्रविशति तापसः ।)

तापसः – (सर्वतोऽवलोक्य) तदिदं शम्बूककण्ठकन्दच्छिदाप्रसूतप्रभूतक्रुधश्चन्द्रणखाया लीलायितम्, यदिदमितस्ततः परिभ्रमद्भिः क्षपाचरैः सर्वतः समाकुलमरण्यम् । अहमपि समिधः समादाय पर्णशालायां त्वरिततरमुपसरामि । प्रत्यर्थिनो हि दुरात्मानो दशकन्धरगृह्याः फलमूलकन्दाशिनामपि तपस्विनाम् । (पुरोऽवलोक्य सभयम्) कथमिदं निशाचरद्वन्द्वमितः परापतति ? । (सम्यगवलोक्य सप्रमोदम्) न हि न हि, निषादद्वन्द्वम् ।

(ततः प्रविशति वैनतेयः प्रभञ्जनश्च ।)

वैनतेयः – ततस्ततः ? ।

[1]............शम्बूकनामा तनयः सूर्यहासाभिधानं देवताधिष्ठितं मण्डलाग्रं वंशजालिकामध्यनिषण्णः प्रतिदिनमाराधयति स्म । परिभ्रमता च सौमित्रिणा सलीलं सूर्यहासमादाय वंशजालिकां छिन्दता शम्बूकस्य शिरः पातितम् ।

प्रभञ्जनः – तनयगवेषणाय समागतायाश्चन्द्रणखायाः शीलविध्वंसो राघवाभ्यां कृत इति च किंवदन्ती ।

तापसः – (सरोषम्) अलीकोऽयं प्रवादः । स्वयं पुनश्चन्द्रणखा वृषस्यन्ती रामलक्ष्मणौ प्रार्थितवती । राम-लक्ष्मणाभ्यामवगणिता च साटोपमाक्रोशन्ती नभस्तलमुत्पतिता । (इत्यभिधाय त्वरिततरं निष्क्रान्तः ।)

वैनतेयः – (सखेदम्) प्रभञ्जन ! चन्द्रणखाप्रसूतोऽयं कलिः क्षपाचरकुलं समूलमुन्मूलयिष्यति ।

(नेपथ्ये)

सद्यो रक्षत हस्तशीकरकणान् दानाविलान् दिग्गजाः !,
पादान् संहर भास्कराऽऽशु, भवत च्छत्रं घनाः ! सर्वतः ।
मार्गं त्याजय निर्विलम्बमरुण ! व्याकृष्य वल्गां हयान्,
देवो देवपतिस्मयव्ययपटुर्नन्वेति लङ्कापतिः ॥ १ ॥

वैनतेयः – (विलोक्य) कथं प्राप्त एव देवो दशकन्धरः ? ।

(ततः प्रविशति पुष्पकाधिरूढो रावणः प्रहस्तप्रभृतिकश्च परिवारः ।)

रावणः –

कैलासोद्धरणोद्भवस्य वलभिद्दर्पच्छिदाजन्मन-
श्चक्राप्तिप्रतिबोधितस्य च परानन्दामृतस्यन्दिनः ।

---

१) अत्रान्तरे तालपत्रीयप्रतिसत्कं १९ तमं पत्रं नष्टं वर्त्तते ।

अन्यस्यापि महोत्सवस्य तममुं चूडामणिं मन्यते,
पौलस्त्यो भविता क्षणे जनकजा यत्रास्पदं चक्षुषाम् ॥ २ ॥

(प्रहस्तं प्रति) कं प्रदेशमलङ्करोति पुष्पकम् ? ।

प्रहस्तः – देव ! प्राप्ता एव दण्डकाम् ।

रावणः – (सहर्षम्)

व्योमन्यत्र निषीद वाहनमहाराज ! प्रसीद क्षणं,
कल्पोत्ताल ! समीर ! वीरजयिनीं जङ्घालतां संवृणु ।
प्राप्तोत्वेष चिरादशेषकरणग्रामश्रमच्छेदिनं,
सीतावक्त्रसरोजदर्शनसुधापानोत्सवं रावणः ॥ ३ ॥

(विलोक्य) कथं निरुद्धवेग एव विमानराजः ? । यदि वा जानकीदर्शनोत्कलिकाशृङ्खलाभिः सकर्णः को नाम न निरुध्यते ? ।

(उभौ उपसृत्य प्रणमतः ।)

रावणः – अये प्रभञ्जन ! कियति दूरे खर-दूषण-त्रिशिरसः ? ।

प्रभञ्जनः – नेदीयांस एवैते दण्डकायाः ।

रावणः – (वैनतेयं प्रति) क्व तौ ? ।

वैनतेयः – देव ! एतौ लतागृहे ।

रावणः – (साभिलाषम्) तदपि विष्टपदृष्टिचकोरीचन्द्रिका स्त्रीरत्नमत्रैव ? ।

वैनतेयः – अत्रैव ।

रावणः – अनुभवामस्तर्हि नेत्रनिर्माणस्य फलम् ।

वैनतेयः – इत इतो देवः ।

(सर्वे परिक्रामन्ति ।)

वैनतेयः – देव ! ताविमौ, तदिदं स्त्रीरत्नम् ।

(ततः प्रविशतो राम-लक्ष्मणौ सीता च ।)

रामः –

अभूमिर्भीतीनां भुजविजितसीमान्तनृपतिः,
प्रियेऽसौ सौमित्रिः कुवलयदलश्यामलतनुः ।
स्फुलिङ्गोग्रच्छायाच्छुरितमसियष्टिं प्रतिवहं-
स्तडित्तेजोभाजः कलयति समृद्धिं जलमुचः ॥ ४ ॥

सीता – (सभयम्) [1]अज्जउत्त ! तुवं पि एदिणा खग्गलाहेण हरिसमुव्वहसि । अहं उण दुट्ठरक्खसीचरिदं निरूविय कंपंती चिट्ठामि ।

---

१) आर्यपुत्र ! त्वमपि एतेन खड्गलाभेन हर्षमुद्वहसे । अहं पुनः दुष्टराक्षसी चरितं निरूप्य कम्पमाना तिष्ठामि ।

लक्ष्मणः – (साहङ्कारम्) आर्ये ! मा भैषीः । आर्ये ! करकलितधन्वनि को नाम साध्वसानामवसरः ? ।

रावणः – (सप्रमोदं प्रहस्तं प्रति)

यस्याः पाणिमवाप्य काननचरः सोऽयं स्पृहायाः पदं,
द्यावा-क्ष्माविजयोन्मदिष्णुमनसो लङ्केश्वरस्याप्यभूत् ।
धातुः शिल्पकलाकलापनिकषः स्वर्भूर्भुवश्चक्षुषां,
निर्माणस्य फलं स्मरास्त्रमसमं सेयं विदेहात्मजा ॥ ५ ॥

(पुनः सहर्षम्) प्रहस्त ! पश्य पश्य, बाह्यनेपथ्यैरकदर्थितो विदेहराजदुहितुरङ्गसन्निवेशः । यतः –

वक्त्रं चन्द्रविलासि, पङ्कजपरीहासक्षमे लोचने,
वर्णः स्वर्णमपाकरिष्णुरलिनीं जिष्णुः कचानां चयः ।
वक्षोजाविभकुम्भविभ्रमकरौ, गुर्वी नितम्बस्थली,
वाचां मार्दवमुज्ज्वलं युवतिषु स्वाभाविकं मण्डनम् ॥ ६ ॥

(पुनः साभिलाषम्) विफल एव ममावतारो जगति यदि विदेहजां विमानराजमारोप्य सलीलं नभसि न क्रीडामि । भवतु ! वेषान्तरेण सन्निधाय निपुणमालोकयामि । (पुनः प्रहस्तं प्रति) वनितावेषो भव । (पुनः प्रभञ्जनस्य कर्णे एवमेव ।)

(प्रभञ्जनो निष्क्रान्तः ।)

(सर्वे भूम्यवतरणं नाटयन्ति ।)

रामः – (विलोक्य सविस्मयम्) कथमयं निर्मानुषप्रचारायां दण्डकायां नागरिकः ? । तत्रापि क्षत्रियकुमार इव । स्वागतं महापुरुषाय ।

(रावणः सर्वेषां प्रणम्य सविनयमुपविशति ।)

(प्रहस्तः सीतायाः पादौ संस्पृश्य सलज्जमुपविशति ।)

रामः – महाभाग ! को भवान् ? कथं वाऽस्यां निर्मानुषप्रचारायां दण्डकायाम् ? किमर्थं चास्मान् पवित्रितवानसि ? ।

रावणः – पाताललङ्कापतेश्चन्द्रोदरस्य विराधनामा सूनुरहम् । चन्द्रोदरं च व्यापाद्य दशकन्धरो भगिनीपतये खराय पाताललङ्कां दत्तवान् । अहं च ततः प्रभृति भ्रष्टराज्यो रावणप्रतिभयेन अत्रत्यतापसपर्णशालासु निलीनस्तिष्ठामि । इयं च मे सधर्मचारिणी । शम्बूकवधप्रभवं च राक्षसोपप्लवं विज्ञाय युष्माकं समयोचितं साहाय्यमाधातुमुपागतोऽस्मि ।

---

१) शल्पकला° ख० । २) °हासक्षम° ख० ।

लक्ष्मणः – (सरोषम्) रघवः परेभ्यः साहायकमपेक्षन्त इति कोऽयं वचोव्यामोहः ? ।

रावणः – यदा न साहायकं तदा समयोचितं किमपि विज्ञपयितुमागतोऽस्मि ।

लक्ष्मणः – विज्ञपितेनाप्यलम् । प्रथय तावद् रावणस्य पराक्रमकथाकन्थाम् ।

रावणः – (विहस्य)

उदीचीं रुन्धाने कलशभुवि विन्ध्यः पुनरपि,
प्रवर्द्धताद्रीणामथ च न निषेद्धा तदपरः ।
तदेवं देवानां भयमभवदष्टापदगिरौ,
यदुत्क्षिप्ते लङ्कापतिरयमपन्थाः स्तुतिगिराम् ॥ ७ ॥

लक्ष्मणः – (सावज्ञम्)

कैलाशं स किल क्षपाचरपतिर्मूर्ध्ना समुत्क्षिप्तवान्,
[1]एतेनोर्जितमार्जिता किमधुना वाहीकवृत्तेन नः ? ।
काश्चित् खड्गकषोपलोपलिखितां तां ब्रूहि चर्यां यया,
प्रत्यासीदति दुर्विदग्धमनसां चित्तं रघूणामपि ॥ ८ ॥

रावणः – (सरोषमात्मगतम्) अहह ! पराक्रमसर्वस्वलुण्टाको दुरात्मा काननचरः । तत् किमेतस्यामुना चन्द्रहासेन शिरः पातयामि ? । (चन्द्रहासं परामृशति । पुनः सविमर्शम्) कोऽयं प्रस्तुतप्रत्यूहकारी रोषविप्रुषां परामर्शः ? । भवतु । (प्रकाशं कृतकं विहस्य) कुमार ! कतिशस्तुभ्यमभ्यर्णजनमनःप्रमोदिनीः पुलस्त्यनन्दनस्य चर्याः सङ्कीर्त्तयामि ? ।

तथा हि –

मुखानि दश, हैहया-ऽमरपती च गुप्तिस्थितौ,
पदं जलधिमूर्द्धनि, स्फटिकपर्वतः कन्दुकः ।
अवाङ्मनसगोचरं चिरमुपादधद्विस्मयं,
स्मयग्रहिलदोस्ततेर्जयति जन्म लङ्कापतेः ॥ ९ ॥

सीता – [2]हीमाणहे ! दहमुह त्ति सुणिय वेवदि ने हिययं ।

रावणः – (साश्चर्यमात्मगतम्) अहो ! विदेहराजदुहितुर्वैदग्धी । यदियमस्मच्चरितचमत्काररोमाञ्चितहृदयाऽपि दयितस्यातिसन्धानाय विरसमाभाषते । भवतु । (प्रकाशम्)

समजनि रणरङ्गे यस्य वक्षोऽभिघातैः,
दलितरदनदण्डः स्वःकरेणुः करेऽणुः ।

---

१) एतेनार्जितमार्जिना किमधुना वा हीनवृत्तेन उ० । २) आश्चर्यम्, दशमुख इति श्रुत्वा वेपति अस्माकं हृदयम् ।

रजनिचरचमूनामीश्वरः श्रूयमाणः,
स भवति न भयाय ब्रूहि केषां मृगाक्षि !?॥ १० ॥

(पुनः सभयमात्मगतम्) 'मृगाक्षि !' इति पदमनयोः काननचरयोरभिलाषशङ्कामुत्पादयेत् । भवतु । (प्रकाशम्) अपि च आर्ये !,

द्विपञ्चैस्तस्याऽऽस्यैर्द्विगुणदशभिर्लोचनभुजैर्वपुर्वैरूप्यं तत् किमपि वहते राक्षसपतेः ।
यदालोक्य स्मेरस्मरपरवशा सा हृदि शची,
दिवोभर्तुर्भूम्ना परिभवभरं श्लाघितवती ॥ ११ ॥

सीता—अज्ज विराह ! अलाहि असदीण नामग्गहणेण ।

रावणः—(सप्रमोदमपवार्य) प्रहस्त ! पश्यन्नसि पतिवञ्चनाचातुरीं विदेहराजदुहितुः ! ।

रामः—

शङ्के भद्रिजदण्डखण्डनकरं वक्षस्थलस्य स्फुरत्कार्कश्यं न खलु प्रपञ्चयति नः पौलस्त्यशौर्यश्रियम् ।
अन्यः कोऽपि स वीरकुञ्जरमनःप्रत्यक्षरूपो न यः,
शौडीर्यस्य न नाम शूरतुलनामर्हन्ति गण्डोपलाः ॥ १२ ॥

तदलमनया निशाचरसङ्कथया । कथय तावत्, किं समयोचितं विज्ञपयितुमागतोऽसि ? ।

रावणः—आगन्तवो यूयम्, अहं पुनराकलितविपिनकुहरो वनेचरदेशीयः । प्रभूतान्तरायं सम्परायं च रावणप्रमुखेभ्यो रक्षोभ्यः सम्भावयामि भवताम् । वधूवागुरानियन्त्रितमनसश्च कुत एव योद्धुमलम्भूष्णवः ? । तदियमार्या वैदेही किमपि गहनं वनकुहरमलङ्कुरुताम् । इयं च मे सधर्मचारिणी देव्याः सविधमधितिष्ठतु ।

रामः—(साक्षेपम्)

युद्धश्राद्धभटांसकुट्टिमतटीशाणानिशाताश्रयो,
देवीमप्यनलम्भविष्णव इमे त्रातुं पृषत्का यदि ।
मथ्नन्तः पृथुपुङ्खपत्रपवनैर्धम्मिल्लमाल्यश्रियं,
द्रुह्येयुः कथमिद्धकीकशघनां पौलस्त्यकण्ठाटवीम् ? ॥ १३ ॥

रावणः—(सभयमपवार्य वैनतेयं प्रति)

१) °भवपुरं उ० । २) आर्य विराध ! अलं असतीनां नामग्रहणेन । ३) निवेदयितु° उ० ४) °मलम्भविष्णवः नाद० । ५) पुङ्खपातपवनै उ० । ६) निर्भिद्युः कथ° नाद० ।

सीतास्वयङ्ग्रहमहैः सुभगम्भविष्णु-
जिष्णुर्जगत्रयममुष्य वनेचरस्य ।
प्रत्यर्थिपार्थिवयशःशशलक्ष्मराहु-
र्बाहुर्धनुर्ननु वहन् किमु नाऽऽदधीत ? ॥ १४ ॥

वैनतेयः –(रामं प्रति) अजितेन्द्रियः खलु दुरात्मा रावणः। न क्षाम्यति कलितसौभाग्यसाराणां परदाराणाम् । तदियमार्या वैदेही क्वचिदपि गोपयितुमुचिता ।

लक्ष्मणः – अजितेन्द्रियः खलु दुरात्मा सूर्पहासः । न क्षाम्यति पार्थिवानां पुंसाम् । तदियमार्या वैदेही क्वचिदपि न गोपयितुमुचिता ।

वैनतेयः –

यस्मात् त्रस्तुर्दिवमभिपतन् गोत्रहा नेत्रवल्लीं,
ग्रीवाभङ्गव्यसनविगमात् तुष्टुवे पृष्ठभाजः ।
बिभ्राणस्य त्रिजगदतिभीमभ्यमित्रीणदीक्षां,
रक्षोभर्तुर्विमृश समरे तस्य कः सांयुगीनः ? ॥ १५ ॥

रावणः –

विघटितहरिदम्भोधितीरः स वीरः,
क्षणमपि हृदि कर्त्तुं साम्प्रतं साम्प्रतं वः ।
दशमुख इति चित्रं भर्तृवैरीति रोषं,
स्मरवपुरिति कामं यः सुरीणां चकार ॥ १६ ॥

किमपरमुच्यते ? –

पविकिणगणहृप्यद्रक्षसो रक्षसो वः,
प्रतिभयमभयानामप्यहं तर्कयामि ।
जनिरजनिविजिष्णो रोदसी यस्य सार्द्धं,
हरिहयहरिणाक्षीपत्रवल्लीव्ययेन ॥ १७ ॥

रामः – (वैनतेयं प्रति)

जम्भारिं दशकन्धरो दशमुखीवैरूप्यवीक्षागल-
द्दम्भोलिस्मरणं रणे यदजयत् किं नाम तत् कौतुकम् ? ।
आश्चर्यानपहार्यधैर्यमनसः सङ्ग्रामशिक्षाचण-
स्थामानः पुनरुन्मदिष्णुहृदयैरिक्ष्वाकवो दुर्जयाः ॥ १८ ॥

रावणः – (सरोषमात्मगतम्) अहह ! दुरात्मा शम्बरशिशुः पराक्रमसर्वस्वमन्यथा करोति ।

१) °वल्लीर्ग्रीवा° उ० ।

(प्रविश्य सम्भ्रान्तः)

तापसः – विराध ! त्वां कुलपतिरादिशति ।

रावणः – (स्वगतम्) साधु रे समयज्ञ प्रभञ्जन ! साधु । (प्रकाशम्) बलीमुख ! किमादिशति कुलपतिः ? ।

(तापसो रावणस्य कर्णे एवमेव ।)

रावणः – (ससम्भ्रमम्) एष समागत एवाहमिति निवेदय कुलपतिपादेभ्यः ।

(तापसो निष्क्रान्तः ।)

रामः – किमाह कुलपतिः ? ।

रावणः – न किञ्चित् ।

लक्ष्मणः – तथापि किम् ? ।

रावणः – प्राप्ता रावण - खर - दूषण - त्रिशिरसो दण्डकाम्, ततस्त्वं पर्णशालासु त्वरितमागत्य निलीयस्वेत्यादिशति कुलपतिः ।

(नेपथ्ये)

नीरन्ध्रं परितश्चमूकरटिभिस्त्रिर्वेष्ट्यतां दण्डका,
शम्बुप्राणहरस्तरुं तरुमभि म्लेच्छैः समालोक्यताम् ।
जीवग्राहमरे ! वनेचरपशुर्ग्राह्यो भवद्भिः स्वयं,
सेनान्यस्तदिदं समादिशति वः पातालङ्कापतिः ॥ १९ ॥

रावणः – (सभयं दिशोऽवलोक्य रामं प्रति) आर्य ! यदेव चिन्त्यमानमस्ति तदेवाऽऽपतितम् ।

प्रहस्तः – (रावणं प्रति) अज्जउत्त ! उत्थेहि । आसमपयं गच्छम्ह ।[2]

सीता – अज्जउत्त ! परित्तायहि लक्खणं कुमारं ।[3]

लक्ष्मणः – (साहङ्कारम्) आर्ये ! कोऽयं रघुवधूनामनुचितः प्रतिभयाडम्बरः ? ।

रामः – (सावहेलम्) वत्स ! त्वमत्रैव देव्याः सविधमाराधय । अहं पुनरेतं निशाचरकोलाहलं गत्वा निवारयामि ।

लक्ष्मणः – आर्य ! मत्कृतोऽयं निशाचरपशूनामुपप्लवः, तदयं मयैव निवारणीयः ।

सीता – (सकम्पम्) अज्जउत्त ! मायाविणो रक्खसा, बालो य एस लक्खणो, ता तुमं य्येव गच्छ ।[4]

लक्ष्मणः – (सरोषम्) आर्ये ! किमिदमरघुकुलोचितं पुनः पुनरभिधीयते ? ।

---

१) °मयं वने° उ० । २) आर्यपुत्र ! उत्तिष्ठ, आश्रमपदं गच्छामः । ३ आर्यपुत्र ! परित्रायस्व लक्ष्मणं कुमारम् । ४) आर्यपुत्र ! मायाविनो राक्षसाः, बालश्च एष लक्ष्मणः, तत् त्वमेव गच्छ ।

रामः – वत्स ! त्वमेव विजयस्व, किन्तु यदि ते पराभवः कोऽपि भवति तदा सिंहनादेन मां ज्ञापयेथाः ।

लक्ष्मणः – यदादिशत्यार्यः । (इत्यभिधाय निष्क्रान्तः ।)

रावणः – इयं मे सधर्मचारिणी पत्रलेखा जानकीसविधमाराधयतु । रक्षःप्रतिभये चाऽस्याः कुमारः शरणम् । अहं पुनः कुमारलक्ष्मणसम्परायमालोकयितुं यास्यामि । (इत्यभिधाय प्रहस्तस्य कर्णे किमपि कथयन् पुष्पकमधिरुह्य च वैनतेयं प्रति)

आकर्षन्ती वचनरचनावागुराभिः प्रसह्य,
प्राणान् धैर्यं भुजवन(? बल)मदं स्थाम सत्त्वं श्रियं च ।
दृग्भ्यां शल्यं हृदि निदधती पाटलापाटलाभ्यां,
वैदेही नः कथय किमियं कालरात्रिः ? प्रिया वा ? ॥ २० ॥

वैनतेयः – (स्वगतम्) किमिदममङ्गलाभिधानम् ? ।

(प्रकाशम्) वनेचरस्य वैदेही प्रिया, देवस्य पुनः कालरात्रिः । (पुनः सकम्पम्) वनेचरस्य वैदेही कालरात्रिः, देवस्य पुनः प्रिया ।

रावणः – (अनाकर्णितकेन) कथमयं दुरात्मा वनेचरः स्थानादस्मादपगच्छेत् ? । भवतु तावत् । अवलोकिनीं विद्यां स्मरामि । (ध्यानं नाटयति ।)

प्रहस्तः – [1]अज्जे ! वेवदि मे हिदयं, जइ कहं पि मे अज्जउत्तो रावणदिट्ठिगोयरं गच्छेज्जा विरूपं भवे ।

सीता – [2]वत्से ! मा भायहि, वणदेवयाओ दे भत्तारं रक्खिस्संति ।

रामः – वत्से ! कोऽयमनिष्टवितर्कः ? ।

उत्पातपावकतरङ्गपिशङ्गधारा-
निर्दग्धदुर्द्धरविरोधिशिरोधिबन्धः ।
हासं दधद् दिविषदां दशकन्धरस्य,
कण्ठाटवीं खलु लविष्यति सूर्यहासः ॥ २१ ॥

रावणः – (समाकर्ण्य सरोषोपहासम्)

दोर्विक्रमेण दशकन्धरमाक्षिपन्तं,
रे रे भुजः ! सहत किं नरकीटमेनम् ? ।
ज्ञातं विदेहतनयापरिरम्भकेलि-
प्रत्याशया किमपि साम्प्रतमाकुलाः स्थः ॥ २२ ॥

---

१) आर्ये ! वेपति मे हृदयम्, यदि कथमपि मम आर्यपुत्रः रावणदृष्टिगोचरं गच्छेद् विरूपं भवेत् ।
२) वत्से ! मा भाहि, वनदेवताः ते भर्तारं रक्षिष्यन्ति ।

(विमृश्य वैनतेयस्य कर्णे एवमेव ।)

(वैनतेयो निष्क्रान्तः ।)

(प्रविश्य)

अवलोकनी – (सविनयम्)

सूर्या-चन्द्रमसौ ग्रसे, विघटये रात्रिन्दिवस्यावधिं,
पत्युर्भोगभृतां हरे फणमणीन्, द्यावा-भुवौ मीलये ।
मान-स्थानविपर्ययेण विदधे स्त्री-पुंसयोर्लक्ष्मणी,
रक्षोराज ! नियोजय क्वचिदिमां कृत्ये निजां किङ्करीम् ॥ २३ ॥

रावणः – अवलोकिनि! किमश्रद्धेयं भवत्याम्? । किन्तु साम्प्रतं दवीयांसं देशमधिगम्य सिंहनादं कुरु ।

(अवलोकिनी निष्क्रान्ता ।)

सीता – (सभयम्) अज्जउत्त![1] खर-रावणसंकुलम्मि समरम्मि लक्खणस्स किं पि भविस्सदि? त्ति न जाणीयदि ।

रामः – देवि! मा भैषीः ।

रणरसिकभुजेभ्यो विक्रमोत्तानने त्राः,
कति कति न रघुभ्यस्त्रासमासादयन्ति? ।
यदि युधमधिजग्मुस्ते खराद्यास्ततः किं?,
स्वयमथ स दशास्यः प्राप कोपात् ततः किम्? ॥ २४ ॥

रावणः – (सखेदम्) किं पुनश्चिरयत्यवलोकिनी? ।

(नेपथ्ये महान् सिंहध्वनिः ।)

सीता – (सभयम्) अज्जउत्त![2] किं नेदं? । वणदेवयाओ! अंबाओ! लक्खणस्स रक्खं करेह । एसो खु अट्ठमो अद्धचक्कवट्टी पिउणा अणाइट्ठो वि जिट्ठबंधवनेहेण तुम्हाणं वणे समागदो ।

रामः – (स्वगतम्) किमिदमश्रद्धेयमाकर्ण्यते? ।

सीता – अज्जउत्त![3] गडुय परित्तायहि वत्सं ।

रामः – (विमृश्य सावष्टम्भम्) देवि! मा भैषीः । प्रमोदजन्माऽयं सिंहध्वनिः, न पुनर्वीरप्रकाण्डं सौमित्रिर्निशाचरैः पराभूयते ।

---

१) आर्यपुत्र! खर-रावणसङ्कुले समरे लक्ष्मणस्य किमपि भविष्यति? इति न ज्ञायते । २) आर्यपुत्र! किमिदम्? । वनदेवताः! अम्बाः! लक्ष्मणस्य रक्षां कुरुत । एष खलु अष्टमः अर्धचक्रवर्ती पित्रा अनादिष्टोऽपि ज्येष्ठबान्धवस्नेहेन युष्माकं वने समागतः । ३) आर्यपुत्र! गत्वा परित्रायस्व वत्सम् ।

रावणः–(सखेदम्) कथमवलोकनीप्रयासोऽपि निर्भाग्यशेखरस्य दशकन्धरस्य वैफल्यमगात् ?।

(प्रविश्य सम्भ्रान्तः)

शबरः–[1]अच्चाहिदं अच्चाहिदं।

रावणः–साधु समयज्ञ वैनतेय ! साधु।

प्रहस्तः–(ससम्भ्रममिव) [2]कुटिलया ! कस्स अच्चाहिदं ?।

शबरः–[3]विराहे लावणेण मालिदे।

प्रहस्तः–[4]हा अज्जउत्त ! कहिं गदो सि ?। देहि मे पडिवयणं। (इति मूर्च्छति।)

सीता–[5]वत्से ! समस्सस समस्सस।

रामः–वत्से ! समाश्वसिहि समाश्वसिहि।

प्रहस्तः–(चेतनामिव प्रपद्य) [6]अज्ज ! अहं हुयासणे पविसिय अज्जउत्तस्स मग्गमणुसरिस्सं, किंतु एगम्मि वणुद्देसे कणगाहरणाइं मए निहित्ताणि चिट्ठंति। तओ ताणि आगच्छिअ गिण्ह। पच्छा पत्तविसेसे मह पुण्णनिमित्तं दिज्जासु।

रामः–न वयमेकाकिनः परस्त्रीभिः सह सञ्चरामहे।

प्रहस्तः–[7]जइ एवं ता अज्जा सीदा आगच्छदु।

सीता–[8]अहं पि अज्जउत्तं विणा न गच्छामि।

प्रहस्तः–[9]भोदु। सयं जेव मुणिय समप्पेमि। कुटिलया ! दंसेहि मग्गं।

(उभौ अदृश्यीभूय रावणान्तिकमुपसर्पतः।)

रावणः–(सखेदम्) प्रहस्त ! वैदेहीं प्रति निष्प्रत्याशीभूताः स्मः।

प्रहस्तः–देव ! उपायान्तरमाधास्यामि। (इत्यभिधाय निष्क्रान्तः।)

सीता–[10]अज्जउत्त ! सिंहनायं सुणिय वेवदि मे हिदयं।

रामः–देवि ! मा स्म विषीदः। प्रमोदजन्माऽयं निनादः।

(नेपथ्ये)

हंहो ! शम्बूककण्ठव्ययचतुरकरं क्रूरमेनं मनुष्यं,
गृह्णीत च्छिन्त भिन्त क्षणुत दलयत स्वैरमहाय सैन्याः !।

---

१) अत्याहितम् अत्याहितम्। २) कुटिलक ! कस्य अत्याहितम् ?। ३) विराधः रावणेन मारितः। ४) हा आर्यपुत्र ! कुत्र गतोऽसि ?। देहि मे प्रतिवचनम्। ५) वत्से ! समाश्वसिहि समाश्वसिहि। ६) आर्य ! अहं हुताशने प्रविश्य आर्यपुत्रस्य मार्गमनुसरिष्यामि, किन्तु एकस्मिन् वनोद्देशे कनकाभरणानि मया निहितानि तिष्ठन्ति। ततः तानि आगत्य गृहाण। पश्चात् पात्रविशेषे मम पुण्यनिमित्तं ...ः-दास्यसि। ७) यदि एवं तद् आर्या सीता आगच्छतु। ८) अहमपि आर्यपुत्रं विना न गच्छामि। ९) भवतु। स्वयमेव ज्ञात्वा समर्पयामि। कुटिलक ! दर्शय मार्गम्। १०) आर्यपुत्र ! सिंहनादं श्रुत्वा वेपति हृदयम्।

भग्ने कोदण्डदण्डे शरधिशरभरे वह्निबाणेन दग्धे,
रे रे दास! क्व यासि? स्मर किमपि खरः सोऽहमग्रे कृतान्तः ॥ २५ ॥

रावणः – (सप्रमोदम्) साधु प्रहस्त! साधु ।

सीता – (सरोषम्) अज्जउत्त! एसो वि हरिसजम्मा सीहणाओ ? ।

रामः – (सखेदम्) व्यक्तं पराभूतो वत्सः । देवि! वनदेवतास्ते शरणम् । अहं पुनर्वत्सं सम्भावयामि । (चापमादाय त्वरिततरं निष्क्रान्तः ।)

रावणः – सम्प्रति रावणस्यावसरः । (विमृश्य) सती खल्वियम्, न शक्यते सावधानाऽपहर्त्तुम् । भवतु । (उच्चैःस्वरम्)

आः क्षुद्रे म्लेच्छपलि! स्मर गुरुविधुरा दैवतं किञ्चिदिष्टं,
लोलद्दम्भोलिकेलिव्रणितकरतलस्त्रातुमिन्द्रोऽपि नालम् ।
शम्बुप्राणप्रयाणभ्रकुटिबहलितक्रोधमैत्रीकरालः,
कालः कालुष्यभाजां हरति खलु खरस्तूलहारं शिरस्ते ॥ २६॥

(सीता सभयमाकर्ण्य मूर्च्छति ।)

(रावणस्तामादाय पुष्पकमधिरोहयति ।)

सीता – (चेतनामास्थाय साक्रन्दमुच्चैःस्वरम्) हा अज्जउत्त! हा वच्छ लक्खण! हा ताय जणय! हा भाय भामण्डल! हा वणदेवयाओ अंबाओ! रक्खेह मं असरणं रक्खसेण निज्जंती ।

रावणः –

आनन्दामृतसारणि! त्रिभुवनप्रह्लादनाचन्द्रिके!,
कोऽयं देवि! विमर्शवन्ध्यमहिमा वाग्विप्रुषां विक्रमः? ।
रक्षोमात्रमवेत्य मां किमु मुधाऽऽक्रन्दाकुला खिद्यसे?,
दासस्ते ननु वीरकुञ्जरभुजः सोऽहं पुरो रावणः ॥ २७ ॥

सीता – (सरोषम्) अरे रत्तिंचर! पारदारिय! मुञ्च मं । अन्नहा सरट्ठं ससंताणं निट्ठविस्सदि तुमं वच्छो मे लक्खणो ।

रावणः – अहह! कर्कशभाषिणी मानुषी, तत् किमेतां चन्द्रहासेन व्यापाद्य क्षिपामि वारांनिधौ? । (पुनः सखेदम्) किमिदमजाकृपाणीयं कर्म? । ननु एतया

---

१) आर्यपुत्र! एषोऽपि हर्षजन्मा सिंहनादः ? । २) हा आर्यपुत्र! हा वत्स लक्ष्मण! हा तात जनक! हा भ्रातः भामण्डल! हा वनदेवताः अम्बाः! रक्षत मां अशरणां राक्षसेन नीयमानाम् । ३) ०न्दाश्रुसुसारणि! उ० । ४) अरे रात्रिञ्चर! पारदारिक! मुञ्च माम् । अन्यथा सराष्ट्रं ससन्तानं निष्ठापयिष्यति त्वां वत्सो मे लक्ष्मणः ।

विनाऽहमपि विपद्ये । भवतु । यावत् कोऽपि समागच्छति तावद् व्रजामि लङ्काम् । (इति परिक्रामति ।)

(नेपथ्ये)

रे रे रात्रिञ्चर ! धर मनाक् पुष्पकं, कं शरण्यं
हृत्वा सीतां रचयसि ? पुरो नन्वयं ते जटायुः ।
शातप्रान्तैः खरकररुहैर्वज्रदण्डव्रणार्द्रां,
गुच्छच्छेदं तव दशमुखीमेष सद्यश्छिनद्मि ॥ २८ ॥

रावणः – कथमयं जटायुर्मामाक्षिपति ? । (पुनः सरोषम्) कष्टम्, सत्यमेव चञ्चु-नख-पक्षप्रहारैरभिहन्ति । भवतु । चन्द्रहासेन व्यापाद्य गच्छामि । (इति निष्क्रान्तः ।)

॥ द्वितीयोऽङ्कः ॥



[तृतीयोऽङ्कः]

(ततः प्रविशति वैनतेयः ।)

वैनतेयः—समादिष्टोऽस्मि दशग्रीवेण, यथा—तत् किमपि कैतवं प्रयोजय, येनास्मदपहृतां जानकीं रामहतको नावधारयति । (विलोक्य ससम्भ्रमम्) किं पुनरयं खरानुचरस्तालजङ्घः पलायमानोऽभ्युपैति ? ।

(ततः प्रविशति तालजङ्घः ।)

वैनतेयः—अये तालजङ्घ ! कथं कान्दिशीको लक्ष्यसे ? ।

तालजङ्घः—(सोरस्ताडम्) किमावेदयामि मन्दभाग्यः ? चतुर्दशभिर्विद्याधर-सहस्रैः सममेकाकिना लक्ष्मणेन दुरात्मना कृतान्तातिथयः कृताः खर-दूषण-त्रिशिरसः ।

वैनतेयः—अहह ! रक्षोराजस्य प्रतापक्षयः ।

तालजङ्घः—पातालल‌ङ्का च तत्कालोपस्थितस्य विराधस्य लक्ष्मणेन प्रसादीकृता ।

वैनतेयः—व्यक्तमियं चन्द्रणखा पितृ-श्वशुरकुलस्य धूमकेतुरुदगात् । (पुनः कर्णे किमपि कथयित्वा) क्व पुनस्तौ राघवौ सम्प्रति ? ।

तालजङ्घः—एतावनुपदमुपसर्पतः ।

वैनतेयः—(सभयम्) अहमपि तर्हि तिरोदधामीति ।

(उभौ निष्क्रान्तौ ।)

(ततः प्रविशति रामो लक्ष्मणश्च ।)

लक्ष्मणः—(साशङ्कम्) कथमार्यः समारोपितचापः सम्भ्रान्तः समायातवान् ? ।

रामः—भवतः सिंहनादेन परपराभवं सम्भाव्य समायातोऽस्मि ।

लक्ष्मणः—क्व मे परपराभवः ? कीदृशश्च सिंहध्वनिः ? । नियतं वञ्चितः केनाप्यार्यः । तत् कथय तावदार्या कथं वर्त्तते ? ।

रामः—इदानीमेव लतागृहे वनदेवताशरणं कृत्वा समायातोऽस्मि ।

लक्ष्मणः—(साक्षेपम्) आर्य ! सरलोऽसि, यदि वनदेवताः क्वापि भवन्ति तदा सिंहनादमप्यलीकं निवारयन्ति । तदेहि तावदार्यां लतागृहे निरूपयामः । (ससम्भ्रममुपसर्पतः ।)

रामः—(वामाक्षिस्फुरणमभिनीय सावष्टम्भम्)

त्यक्तास्ताः कुलभूमयः, परिहृताः शोकाकुला ज्ञातयः,
प्रारब्धा वनचारिणां समुचिता वृत्तिस्त्रपाकारिणी ।
एतस्मिन् विहितेऽपि दुष्करविधौ वेधा विधास्यत्ययं,
यत् किञ्चित् पुरतः प्रपत्तुमखिलं रामस्तदप्युत्सुकः ॥ १ ॥

(पुनरवलोक्य साशङ्कम्)

वृक्षे वृक्षे करटपटलान्युच्चकैर्व्याहरन्ते,
धावन्त्येते ककुभि ककुभि क्षुत्करालाः शृगालाः ।
भूयो भूयः क्रमयतितमामस्रमिस्रः समीरः,
त्रस्तं त्रस्तं विपिनमधुना वत्स! कस्मादकस्मात्? ॥ २ ॥

लक्ष्मणः - (सास्रम्) आर्य !

यथा त्रस्तः क्रीडामृगशिशुरयं धावति जवाद्,
यथा लीलाबर्ही वियदभिमुखं रौति चकितः ।
यथा तूष्णीमास्ते तरलनयनः पञ्जरशुकः,
तथा जाने सीताविरहितमिदं काननपदम् ॥ ३ ॥

रामः - (सास्रम्) हा प्रिये वैदेहि! क्व मामेकाकिनं गहने वने सन्त्यज्य प्रयाताऽसि? । (क्षणं मूर्च्छामभिनीय कृतकधैर्यम्) वत्स! लतागृहाभ्यन्तरमवलोकय । क्रव्यादप्रतिभयेन तिरोहिताऽस्ति देवी? ।

लक्ष्मणः - (मध्यमवलोक्य सबाष्पम्) आर्य! मध्येऽपि नास्ति ।

(रामः सहसा मूर्च्छति ।)

लक्ष्मणः - (सबाष्पम्)

प्रवासितस्य पुत्रस्य शोकशङ्कुवशां दशाम् ।
पश्य पश्याऽम्ब कैकेयि! मोदते येन ते मनः ॥ ४ ॥

रामः - (चेतनामास्थाय)

त्वमेव पत्तिर्मित्रं वा मन्त्री वा बान्धवोऽथवा ।
तदेहि देहि वैदेहि! मह्यं दुस्थाय दर्शनम् ॥ ५ ॥

(पुनः सवैकल्यम्)

अरण्ये मां त्यक्त्वा हरिण! हरिणाक्षी क्व नु गता?,
पराभूतो दृष्ट्या कथयसि न चेन्मास्म कथय ।
अरे क्रीडाकीर! त्वमपि वहसे कामपि रुषं,
यदेवं तूष्णीकामनुसरसि वाचंयम इव ॥ ६ ॥

लक्ष्मणः - (सास्रम्) आर्य! किमेतौ तपस्विनौ जानीतः? । तत् कोऽयं व्यामोहः? ।

रामः - (समन्ततोऽवलोक्य)

कुरुबक ! कुतस्तादृग् भूयस्तव स्तनताडनं ?,
कथयसि कथां कस्य प्रेम्णा पुरः सखि सारिके ! ।
बकुल ! मुकुलापीडं कस्ते करिष्यति सम्प्रति ?,
स्थितमिव तव क्रीडाबर्हिन् ! शिखण्डविमार्जनम् ॥ ७ ॥

लक्ष्मणः – (सबाष्पं आत्मगतम्) कथमार्यश्चेतनादुस्थामवस्थामुद्वहति ? । (प्रकाशम्) आर्य ! स्थानान्तरे क्वचिदार्यां विलोकयामः ।

रामः – (लक्ष्मणेन दत्तहस्तावलम्बः परिक्रामति । पुनः स्थित्वा) वत्स ! कोऽयं वनोद्देशः ? ।

लक्ष्मणः – आर्य ! लतागृहाभ्यर्णसरःपरिसरावनीरुहराजिरियम् ।

रामः –

रक्ताशोक ! तमाल ! चम्पकलते ! हिन्ताल ! तालाऽऽश्रमे
युष्माकं वयमास्महे चिरमतः कस्मादुपेक्ष्यामहे ? ।
जाड्यं मुञ्चत, दक्षिणाः स्त, करुणां दीनेषु धत्त क्षणं,
भिक्षां प्राणमयीं प्रयच्छत, बत ! ब्रूत क्व सा जानकी ? ॥ ८ ॥

अपि च –

अनुपकृतयः कामं तूष्णीं द्रुमा दधताममी,
उपकृतवती देवी किञ्चित् पुनस्तव केसर ! ।
त्वमथ कथयोदन्तं तस्याः क्व सा वसतीह किं
क्वचिदपि वनोद्देशे ? केनाप्यथो हठतो हृता ? ॥ ९ ॥

लक्ष्मणः – आर्य ! विलोकितोऽयं सर्वतो वनोद्देशः परमार्या न दृश्यते । तदन्यतः क्वापि मृगयामहे ।

रामः – (दत्तहस्तावलम्ब एव परिक्रम्य)

श्लथय सपदि दित्सां वत्स ! हस्तावलम्बे,
समुपदिश मनाग् मे वर्त्म भूत्वा पुरोगः ।
जनकपतिसुतास्याम्भोरुहध्यानरोहा-
ज्जलतरलिततारं नैतदोजस्वि चक्षुः ॥ १० ॥

लक्ष्मणः – कोऽयं सत्त्वैकनिधेरार्यस्य धैर्यविप्लवः ? ।

(नेपथ्ये सकलकलम्)

अले कंकालया ! कंकालया ! एदं अच्छलियं लाम-लक्खणाणं कडुय कहेहि ।

---

१) पुरा शुक ! सारिके ! उ० । २) °दुपेक्षा मयि उ० । ३) स्थ उ० । ४) अरे कङ्कालक ! कङ्कालक ! एतद् आश्चर्यं राम-लक्ष्मणयोः गत्वा कथय ।

रामः—यथा शबराः शब्दायन्ते तथा जानेऽपरत्र सीता तिष्ठति ।

(प्रविश्य सम्भ्रान्तः)

शबरः—[1]भट्टा ! एदस्सिं निगुंजे चिट्ठदि ।

रामः—(सत्वरम्) जानकी तिष्ठति ? ।

शबरः—[2]लुहिलालित्तसव्वंगे महंते पक्खी गयणादो निवडिदे चिट्ठदि । ता निरूवेदु भवं ।

रामः—(सखेदम्) यदि न सीता तदा किं निरूपितेन ? ।

लक्ष्मणः—तथापि विलोकयितुमुचितम् ।

(सर्वे परिक्रामन्ति ।)

(ततः प्रविशति कृपाणपाटितपक्ष-शिरोधि-चरणो लक्ष्यशून्यान् पक्ष-चञ्चु-नखप्रहारान् मुञ्चमानः पक्षी ।)

रामः—(विलोक्य ससम्भ्रमम्) कथमयमावयोर्मित्रं जटायुः ? । वत्स ! किमिदमरिष्टान्तरम् ? ।

लक्ष्मणः—अरे कङ्काल ! केनायं व्यापादितः ? ।

शबरः—(सभयम्) [3]हगे न जाणामो ।

पक्षी—(मन्दस्वरम्) अहह ! ।

रामः—(सास्रम्)

आर्य ! ब्रूहि रघूद्वहेषु किमियं वृत्तिः पराची विधेः ?,
प्रत्यङ्गं तिलशः शठेन निहतः केनासि शातासिना ? ।
दुष्प्रेक्षस्य निदानमस्य किम[4]भूत् पापीयसः पर्वणः ?,
किं न क्वापि विलोक्यतेऽद्य विपिने सा ते वधूर्जानकी ? ॥ ११ ॥

पक्षी—(साक्षेपम्)

अस्त्रं शस्त्रमथो गृहाण किमपि व्यक्तं, न ते सम्प्रति
त्राणं प्राणमुषा जटायुषि रुषा साटोपमास्कन्दति ।
मथ्नाम्येष विरोधिवीरसमरश्रद्धा[5]पुरोभागिनः,
चञ्चच्चञ्चुपुटाग्रमन्थचलनैस्ते स्कन्धबन्धान् युधि ॥ १२ ॥

रामः—पूर्वप्रवृत्तमतिः तट (?) सम्परायसंरम्भावेशवशव्याकुलो जटायुर्नास्मद्वचनमाकर्णयति ।

---

१) भर्त्तः ! एतस्मिन् निकुञ्जे तिष्ठति । २) रुधिरालिप्तसर्वाङ्गः महान् पक्षी गगनाद् निपतितः तिष्ठति । तद् निरूपयतु भवान् । ३) वयं न जानीमः । ४) समभूत् उ० । ५) °पुराभोगिनः उ० ।

लक्ष्मणः–(समीपीभूय तारस्वरम्) "आर्य! ब्रूहि०" श्लो० ११ (इत्यादि पुनः पठति।)

(पक्षी सक्रोधं लक्ष्मणाभिमुखं प्रतिमुहुः पक्ष-चञ्चु-नखप्रहारान् क्षिपति।)

रामः–वत्स! मास्म युद्धवीरस्यास्य सविधमधितिष्ठ। अपि नामायं क्रोधान्धचेता भवत्यपि प्रहरेत्।

(लक्ष्मणः किञ्चिदपसर्पति।)

रामः–(तारस्वरम्)

संरम्भं त्यज युद्धवीर!, विकटत्रोटेः किमाडम्बरो?,
दुर्दान्ताहितशिक्षयोः शिथिलय क्षेपं क्षणं पक्षयोः।
नाऽऽस्ते सङ्गररङ्गनर्त्तनधुराधुर्यः पुरः कोऽपि ते,
पश्योन्मील्य विलोचने ननु निजौ स्निग्धाविमौ राघवौ ॥१३॥

पक्षी–(प्रहारवेदनामभिनीय मन्दस्वरम्) अहह! (पुनः ससंरम्भम्)

वत्से! मा स्म रुदः प्रवीरविजयश्रद्धालुदोर्विक्रमो-
त्तालव्यालकुलाहितुण्डिकनखः प्राप्तो जटायुः स्वयम्।
रे क्रव्यादनिषाद! नन्दसि कियत् त्रोटीकुठारत्रुट-
त्कण्ठाभोगविसंस्थुलः स्फुरदसिन्यासैः किमेभिस्तव? ॥ १४ ॥

शबरः–ईदं[1] ज्जेव पुणो पुणो पढंते गयणादो एशे निवडिदे।

लक्ष्मणः–सर्वमेतदमुना समरसंरम्भानुबन्धेन पूर्वप्रवृत्तं मन्त्रितम्।

रामः–निश्चितमयं सीतापहारकेण व्यापादितः। (पुनरुच्चैःस्वरम्) आर्य वीरावतंस! सीतापहारकेण केनापि रक्षसा किमसि कृतो[2]........................

[**लक्ष्मणः**–(सबाष्पम्) आर्य!

निस्पन्दतां वपुरुपैति यथा समन्तात्
पक्षौ यथांसशिखरप्रणयानपेक्षौ।
आलिङ्गति क्षितिमियं च यथा शिरोधि-
र्जाने तथाऽजनि गतायुरयं जटायुः ॥ १५ ॥

रामः–हा प्रिये वैदेहि! हहा निर्निमित्तबन्धो परोपकारैकरसिक जटायो! क्वासि?। देहि मे प्रतिवचनम्।

विराधः– ....] रात् पातालङ्कापतिरहं जातोऽस्मि। तदुपनीयतां न्यासीकृतां मदीयां प्रियां पत्रलेखाम्, येनाहं पैतृकीं राज्यलक्ष्मीमनुभवामि।

१) इदमेव पुनः पुनः पठन् गगनाद् एष निपतितः। २) अत्रान्तरे तालपत्रीयप्रतिसत्कं ५६ तमं पत्रं त्रुटितं वर्तते इति तत्स्थानापन्नस्तावदंशो मया उद्धारादुद्धृतोऽस्ति।

रामः – (सवैलक्ष्यम्) 'रावणेन विराधो व्यापादितः' इति कुटिलकादवधार्य जातवेदसि प्रवेष्टुकामा चिरमस्मदन्तिकमपहाय गता ते प्रिया पत्रलेखा ।

लक्ष्मणः – कुटिलकावेदितः खल्वयमुदन्तो व्यलीकः, नैमित्तिकोपदेशेन खरायोधनमूर्द्धनि विराधो मदभ्यर्णे स्थितवान् ।

विराधः – महापुरुषचूडामणे ! भवत्यपि यदि न्यासापहारः, खिलस्तर्हि शरण्यानां पन्थाः ।

(रामः सव्रीडमास्ते ।)

विराधः – अपहृता खलु दशकन्धरेण प्रिया मे पत्रलेखा, अस्ति हि दुरात्मनोऽस्य पत्रलेखायां पुराऽपि गाढानुरागं चेतः ।

रामः – (लक्ष्मणं प्रति) केयमस्माकमुत्पातपरम्परा ? ।

विराधः – (सोरस्ताडम्) हा प्रिये पत्रलेखे ! कामिमां दुःस्थामवस्थामधिगताऽसि ? । (इति मूर्च्छामभिनयति ।)

रामः – विराध ! कोऽयं राजन्यवंशविरोधी धैर्यविप्लवः ? । गत्वा विलोकय तापसपर्णशालासु । सम्भाव्यते तत्र ते कलत्रम् ।

(प्रविश्य सम्भ्रान्तः)

तापसः – विराध ! कुलपतिस्ते समादिशति ।

विराधः – (स्वगतम्) साधु समयज्ञ तालजङ्घ ! साधु । (प्रकाशम्) कौटिल्य ! किमादिशति मे कुलपतिः ? ।

तापसः – 'हा विराध ! हा विराध !' इति प्रलपन्ती काऽपि युवतिः केनापि क्रव्यादेनापहृता । भवन्तं च भूयो भूयो दशकन्धरः पर्णशालासु गवेषितवान्—इति समादिशति ते कुलपतिः ।

विराधः – कृतकं वेपते ।

रामः – निश्चितं वत्स ! रावणः पत्रलेखामपहृतवान् । जटायुरपि पत्रलेखां त्रातुकामो रावणेन व्यापादितः ।

(पुनर्विराधं प्रति)

न्यासप्रवासमधुना निरवद्यधाम्नि,
व्यालोक्य भास्करकुले प्रथमं कलङ्कम् ।
व्रीडावतो मम भवद्वनितापहाराद्,
भूम्ना मतो जनकराजसुतापहारः ॥ १६ ॥

विराधः – परमार्थतः सीतापहार एवायम्, न पत्रलेखापहारः ।

तापसः—कुमार! विराधः समुचितमभिहितवान् । परव्यसनसङ्क्रान्तिदर्पणतलानि हि रघूणां चेतांसि । विशेषतः पुनरियं पत्रलेखा रक्षोपहारत्रस्तेनामुना भवत्येव निक्षेपः कृतः ।

(रामः सलज्जमधोमुखस्तिष्ठति ।)

विराधः—कुमार! अलं कृत्वाऽतीतशोचनम् । अतः परमपि भवानेवास्मत्प्रतिपन्थिनः प्रतिहनिष्यति ।

रामः—(सखेदम्)

स्त्रीत्राणमात्रमपि यो न विभुर्विधातुं,
सोऽहं निहन्तुमहितान् किमलम्भविष्णुः ? ।
क्लीबं विचिन्त्य वसुधातलपालनायां,
माताऽपि केकयसुता खलु मामपास्थत् ॥ १७ ॥

(नेपथ्ये)

भो भोः पक्कणचारिणः! क्व तौ दाशरथी ? ।

तापसः—(ससम्भ्रमम्) व्यक्तमेष रावणस्य व्याहारः, तदहमाश्रममनुसरिष्यामि । (इति निष्क्रान्तः ।)

विराधः—(सभयम्) कुमार! खर-दूषण-त्रिशिरोवधप्रबुद्धाधिकक्रोधो दशकन्धरः समराय भवतो गवेषयति ।

(लक्ष्मणश्चापमारोपयति ।)

(विराधः सभयं तिरोधत्ते ।)

(ततः प्रविशति सम्भ्रान्तो विद्याधरः ।)

विद्याधरः—अलमलं कोदण्डाडम्बरेण । किमपि निवेदयितुकामः समायातोऽस्मि ।

रामः—सत्वरमावेदय ।

विद्याधरः—

कैलाशकम्पचणरावणदर्पसर्प-
संस्तम्भनप्रवणजाङ्गुलिकैकदोष्णः[1] ।
श्रीवालिनः कपिपतेरनुजो जगत्सु,
विख्यातविक्रमगुणाभिजनः समस्ति ॥ १८ ॥

रामः—ततः किम् ? ।

---

१) °प्रबलजा° ड० ।

विद्याधरः - तस्य सुग्रीवनाम्नो निदेशेन हनुमतः समीपं गत्वा प्रतिनिवृत्तेन मया चित्राङ्गदाभिधानेन दृष्टः ।

रामः - जानकीमपहरन् कोऽपि दृष्टः ? ।

विद्याधरः - 'हा रामभद्र ! हा लक्ष्मण !' इति प्रलपन्तीं जानकीमपहरन् रावणो दृष्टः ।

रामः - हा प्रिये वैदेहि ! निशाचरगोचरमधिगताऽसि ।

शबरः - भट्टा ! 'हा लाम ! हा लक्खण' त्ति पलाओ अम्हेहि वि सुणिदो ।

लक्ष्मणः - निश्चितमेताभ्यां विराध-तापसाभ्यां रक्षोभ्यां भाव्यम् । कथमपरथाऽऽवयोः सन्निहितयोरिमौ रावणप्रतिभयेन तिरोधत्तः ? ।

रामः -

राज्यश्रीः कलिता तृणं, विगणितः क्लेशो न कान्तारभूः,
न ध्यातौ पितरौ, स्मृता न सुहृदो, नोत्कण्ठितं ज्ञातिषु ।
यत्प्रेमाब्धिविलग्नमग्नमनसा तद् ब्रह्म लीढं मया,
रक्षस्तां रुदतीं जहार कठिनः सोऽहं पुनः प्राणिमि ॥ १९ ॥

विद्याधरः - जटायुरपि सीताया आनुपदिकश्चन्द्रहासन्यासे रावणेन व्यापादितः ।

रामः -

साक्षाद् यज्ञभुजां निहत्य समरे तं रावणं प्राणतीं,
यां द्रक्ष्यामि विदेहराजतनयां सेयं न मां बाधते ।
प्राणान् यस्तु परोपकारकरणप्रत्याशया केवलं,
मत्कार्ये विजहौ हहा ! कथमयं दृश्यो जटायुर्मया ? ॥ २० ॥

लक्ष्मणः - आर्य ! किममुना कैतवप्रवृत्तेन कर्मणा मुहुर्मुहुरनुशोचितेन ? । धैर्यमवलम्ब्य जानकीं पत्याहर्तुमुपायं विचिन्तयामः ।

रामः -

क्लीबः स्यां शुचमादधे यदि मुहुर्धृत्वाऽथ धैर्यं भजे,
क्रीडां डम्बरिणीं तदा न चरितं प्रेमानुरूपं भवेत् ।
दुःखावासममुं विदेहदुहितुः कृत्वा प्रवासं हहा !,
दैवेनोपनतः शठेन विषमः कोऽप्येष पन्था मम ॥ २१ ॥

विद्याधरः - महाभाग !

सरोषे सौमित्रौ क्षिपति विशिखालीं खरशिर-
श्छिदालङ्कर्मीणां समरभुवि के नाम रिपवः ? ।

---

१) भर्त्तः ! 'हा राम ! हा लक्ष्मण !' इति प्रलापः अस्माभिरपि श्रुतः । २) राज्यश्रीर्गणिता तृणाय त्रिदितः क्लेशो उ० ।

तदद्यप्रातीनां कलय दशकण्ठव्ययकरीं,
क्रियामद्यश्वीनं गणय दयिताया व्यतिकरम्[1] ॥ २२ ॥

रामः—(सावष्टम्भम्) चित्राङ्गद !

निहत्य दशकन्धरं सह विपक्षरक्षःकथा-
प्रथाभिरधिसङ्गरं जनकजां ग्रहीष्ये ध्रुवम् ।
शशाक न स रक्षितुं रघुपतिः परेभ्यः प्रिया-
मयं तदपि सम्भवी चिरमकीर्त्तिकोलाहलः ॥ २३ ॥

लक्ष्मणः—(स्वगतम्) अन्तरयामि कथान्तरेणाऽऽर्यस्य चेतः । (प्रकाशम्) चित्राङ्गद ! किंनिमित्तं हनूमतः सविधमनुसृतवानसि ? ।

विद्याधरः—कुमार ! तारां रिरंसुः सुग्रीवरूपधारी विद्याधरः कोऽपि किष्किन्धामधिष्ठितवान् ।

रामः—(सकौतुकम्) ततस्ततः ? ।

विद्याधरः—ततः प्रभृति सत्यसुग्रीवो बहिरसत्यसुग्रीवः पुनर्मध्ये प्रतिवसति ।

लक्ष्मणः—(साश्चर्यम्) ततस्ततः ? ।

विद्याधरः—प्रतिवासरं प्रवरविद्याबलेनासत्यसुग्रीवेण सत्यसुग्रीवः पराजीयते । ततः साहायकार्थिना सत्यसुग्रीवेण हनूमतः समाकारणाय प्रेषितोऽस्मि ।

रामः—चित्राङ्गद ! कृतममुना हनूमदागमनक्लेशेन । तमहमसत्यसुग्रीवं व्यापादयिष्यामि ।

विद्याधरः—(सप्रमोदम्) तर्हि यौष्माकीणमेनं प्रतिज्ञाभरमहं सचिवाय जाम्बवते निवेदयामि । दिवसोऽपि परिणतवया वर्त्तते ।

रामः—शिवास्ते पन्थानः । (विद्याधरः प्रणम्य निष्क्रान्तः ।)

रामः—(सखेदम्) वत्स !

कलत्रमपि रक्षितुं निजमशक्तमात्मान्वय-
प्रसूतमभिवीक्ष्य मामहह ! जातलज्जाज्वरः ।
प्रकाशयितुमक्षमः क्षणमपि स्वमास्यं जने,
प्रयाति चरमोदधौ पतितुमेष देवो रविः ॥ २४ ॥

तदेहि लतागृहमध्ये[2] तिष्ठावः ।

(इति निष्क्रान्ताः सर्वे ।)

॥ तृतीयोऽङ्कः ॥

---

१) व्ययकरम् उ० ।　२) °गृहमनुतिष्ठामः उ० ।

चतुर्थोऽङ्कः।

(ततः प्रविशति कञ्चुकी कलकण्ठः ।)

कलकण्ठः—यदि शतशस्तानि तानि छलपिच्छिलानि कर्माण्याधायाऽऽत्मा कलङ्कपङ्किलः क्रियते तथापि लङ्कापतिर्मामभिक्रुध्यति ।

कुस्वामी च हुताशश्च द्वावप्येतौ सहोदरौ ।
एकः सेवकसन्तापी स्वभावः कथमन्यथा ? ॥ १ ॥

भवतु तावत्, अस्मिन् कैतवकर्मणि शुकनाशमपि सङ्केतयामि । (आकाशे) शुकनाश ! शुकनाश ! ।

(प्रविश्य)

शुकनाशः—एषोऽस्मि ।

(कलकण्ठः कण एवमेव ।)

शुकनाशः—यथावसरमाधास्यामि । (विमृश्य) आर्य ! पश्य, सीता तृणायापि रावणं नाभिमन्यते ।

कलकण्ठः—किमेवमभिदधासि ? ।

स्वतो न कश्चन गुरुर्लघुर्वाऽपि न कश्चन ।
उचिता-ऽनुचिताचारवश्ये गौरव-लाघवे ॥ २ ॥

शुकनाशः—किं पुनः सर्वकर्माणबुद्धिर्देवो न स्वयमेवावबुध्य दुराचारमपजहाति ? ।

कलकण्ठः—किमिदं पुनः पुनरचतुरजनोचितं विपश्चयसि ? ।

अधार्मिकमलावण्यमगुणं मर्मभाषिणम् ।
यः स्वयं स्वं विजानाति तेन वन्ध्या वसुन्धरा ॥ ३ ॥

शुकनाशः—आर्य ! शक्रजिता पाशैर्नियम्य लङ्कापतेः पुरः प्रक्षिप्तेन तेन हनूमता किं कृतम् ? ।

कलकण्ठः—(सावज्ञम्) पादेन लङ्कापतेर्दशकिरीटीमभिहत्य तेन गतम् ।

शुकनाशः—अहह ! व्रीडाकरं पर्व । तद् गच्छाम्यहं यथादिष्टमाधातुम् । (इति निष्क्रान्तः ।)

(नेपथ्ये)

ऐश्वर्यं वैदग्धी सौन्दर्यं तरुणिमा प्रियवियोगः ।
तदिदममूर्त्तो वह्निर्विक्लवयति कं न धीरमपि ? ॥ ४ ॥

कलकण्ठः – किमेष लङ्कापतिर्वैदेहीविरहानलाभितापमनुभवति ? ।

(ततः प्रविशति रावणः कुन्तलकश्च ।)

रावणः – कुन्तलक !

दम्भोलिदण्डोऽपि पुरा व्यधत्त,
बाधां न यस्याऽऽहवसौण्डदोष्णः ।
तां तस्य सीतां स्मरतः प्रकामं,
कामेन का मे न कृता व्यथाऽन्तः ? ॥ ५ ॥

(विमृश्य) अभिनवावतारशृङ्गारकमनीयकान्तिर्मधुरयं मधुरतरुणिमाया विदेहदुहितुः कामपि मुदमावहति वा न वा ? ।

कुन्तलकः –

नवावतारहृद्योऽपि मधुस्तस्या मृगीदृशः ।
त्वां विना भूर्भुवः-स्वःश्रीकान्त ! कां तनुतां मुदम् ? ॥ ६ ॥

रावणः – (साश्वासम्) कच्चिदस्मद्विरहानलो मैथिलीमपि विक्लवयति ? ।

कुन्तलकः – यथा कथां प्रथयति त्रिजटा तथा यदि सत्यं तदा मैथिलीमपि युष्मद्विरहानलो विक्लवयतीति वितर्कयामि ।

रावणः – कथयति जानकीवियोगवार्त्तां प्रतिवासरं त्रिजटा । वयं पुनः कामपि कामार्त्तिं न लक्षयामः ।

कुन्तलकः – किमेवमादिशति देवः ? ।

प्रायेण पुंसि परिरम्भण-चुम्बनानि,
संतन्वते स्फुरति वामदृशां स्मरार्त्तिः ।
एतास्ततः कतिपयाः प्रियविप्रयोगे,
कालं क्षिपन्ति कुसुमेषुविकारवन्ध्याः ॥ ७ ॥

रावणः – (साक्षेपम्) रावणः खल्वहमनिच्छन्तीनां परयुवतीनामालिङ्गनचुम्बनादीन् कामार्त्तिप्रबोधोपायान् प्रसभं किमनुतिष्ठामि ? । (ऊर्द्ध्वमवलोक्य) कथमयं मरीचिमालाभिरपनयन्नम्भोजखण्डस्य वदनमुद्रामुदयाचलचूलिकां समलङ्करोति विश्वैकलोचनं विरोचनः ? ।

व्यर्थं स्मापयसे बहूनि कमलान्यादित्य ! तन्मैथिली-
वक्त्राम्भोरुहमेकमेव यततां स्मेरं विधातुं भवान् ।
स्मेरेऽस्मिन् परितापकारिणमतिक्षुद्रं क्षपायाः पतिं,
क्षिप्त्वा त्वां क्षणदास्वपि प्रथयति स्फूर्जत्प्रभं रावणः ॥ ८ ॥

किञ्च–

दिनकर! कृपयैव प्रेरितश्चेत् तदास्य,
व्यतिषज विधुरस्य प्रेयसीं चक्रनाम्नः।
अथ फलमपि किञ्चित् काङ्क्षसि क्लेशलभ्यं,
घटय ननु तदानीं जानकीं रावणस्य ॥ ९ ॥

(कुन्तलकं प्रति) कलकण्ठीबहलकलकलोपद्रुतश्रवणोत्पलैरस्माभिरमीभिः समानव्यसनैर्दीर्घिकाचक्रवाकमिथुनैः समं क्षपा क्षयं लम्भिता।

(कलकण्ठ उपसृत्य प्रणमति।)

रावणः–(साक्षेपम्) सौविदल्ल! निशीथसमादिष्टस्य कृत्यस्य कोऽयं कालविलम्बः?।

कलकण्ठः–(सभयम्) देव! निशीथ एव कुम्भकर्णप्रयाणप्रवादः कृतः पुरस्त्रिजटायाः।

रावणः–जानकी श्रुतवती?।

कलकण्ठः–अथ किम्?।

रावणः–श्रुत्वा किमाह?।

कलकण्ठः–न राघवः कुम्भकर्णपराक्रमस्य विषय इत्याह।

रावणः–अपरं निशीथसमादेशं कः प्रतिविधास्यति?।

कलकण्ठः–शुकनाशः प्रतिविधास्यति।

रावणः–(स्मृत्वा) वनेचरप्रेषितेन तेन बलीमुखडिम्भेन किं किमाचरितम्?।

कलकण्ठः–वनेचरस्याभिज्ञानमूर्मिकां सीतायाः बलीमुखः समर्पितवान् कुशलकथां च प्रथितवान्। (पुनरपवार्य कुन्तलकं प्रति) यत् पुनरुद्यानं भग्नम्, अक्षकुमारो व्यापादितः, शतशो लङ्काहर्म्याणि पातितानि, तदतीवलज्जाज्वरकरम्, नाख्यातमेव शोभामावहति।

कुन्तलकः–देव! ताराभिलाषिणं सुग्रीवरूपधारिणं साहसगतिनामानं विद्याधरं व्यापाद्य वर्षीयान् वनेचरः सुग्रीवाय सतारां किष्किन्धां दत्तवानिति किंवदन्ती।

रावणः–(कृतकमनाकर्णितकेन) सौविदल्ल! दर्शय पन्थानं येन जानकीचरणाम्भोजसपर्यासुखमनुभवामि।

(सर्वे परिक्रामन्ति।)

रावणः–(कर्णं दत्त्वा) त्रिजटया सह सीता किमपि मन्त्रयते तत् तिरोहिता एव क्षणमाकर्णयामः।

(ततः प्रविशति सीता त्रिजटा च ।)

सीता – किञ्च[1] तियडे ! जदो पहुदि अहं आणीदा तदो पहुदि अत्थि एदम्मि अत्थे अहिलासो ।

रावणः – (श्रुत्वा सप्रमोदम्) एतस्मिन् रावणानुसरणेऽस्त्यभिलाषः । केयमनभ्रा श्रवणोत्पलानां सुधावृष्टिः ? । कोऽयं दुस्तपतपःप्रसूतस्य प्राचीनपुण्यस्य विपाकप्रकर्षः ? । (पुनरात्मानमवलोक्य)

वक्त्राणि हे ! हसत गायत तारतारं,
नेत्राणि ! चुम्बत विहस्य च कर्णपालीम् ।
दोर्वल्लयः ! कुरुत ताण्डवडम्बरं च,
श्रीरावणं ननु विदेहसुता रिरंसुः ॥ १० ॥

भवतु । पुरः समाकर्णयामि ।

सीता – पडिदिणं[2] च एदं पडिवज्जिदुं समीहामि ।

रावणः – यदि मां प्रतिदिनं प्रतिपत्तुं समीहते तदानीं किं प्रत्यूहनिदानम् ? ।

सीता – पर[3] अज्जउत्तस्स हणूमंतमुहादो कुसलवत्तं सुणिय पुणो वि मे हियय सावेक्खं जादं ।

रावणः – (विमृश्य) निश्चितं रावणानुसरणे जनकदुहितुः शबरप्राणितावस्थानं प्रत्यूहः । निमिकुलप्रसूता खल्वियं महासत्त्वप्रकृतिश्च जानकी न प्रभवति परिणेतरि प्राणति रिरंसुरपि पत्यन्तरमाधातुम् । (विचिन्त्य) यदि राघवतिरस्कारेण जानकीजानितां कलयति दशकन्धरस्तदानीमत्यल्पमौपयिकम् । (सलज्जम्) शबरपराजयः परः कलङ्को रावणपराक्रमस्य । भवतु तावत् । दोर्दण्डान् सान्त्वयामि ।

त्रपां क्षणमुपेक्ष्य हे नयत राघवं लाघवं
पुरन्दरपराक्रमग्लपनचञ्चवो बाहवः ! ।
यदि स्फुरति जानकी जघनपीठ-कण्ठस्थली-
कपोलफलक-स्तनस्तबककेलिकौतूहलम् ॥ ११ ॥

भवतु ।[4] ....

[सीता – (त्रिजटां प्रति) यदि रामः कदाचिदपि विनाशं यास्यति तदाऽहं हुताशनं साधयिष्ये ।

१) किञ्च त्रिजटे ! यतः प्रभृति अहं आनीता ततः प्रभृति अस्ति एतस्मिन् अर्थे अभिलाषः । २) प्रतिदिनं च एतत् प्रतिपत्तुं समीहे । ३) परं आर्यपुत्रस्य हनूमन्मुखात् कुशलवार्तां श्रुत्वा पुनरपि मम हृदयं सापेक्षं जातम् । ४) अत्रान्तरे ताडपत्रीयप्रतिसत्के ७६ तमं पत्रं नष्टं वर्तत इति खण्डितांशस्थाने उद्धारगतोऽशोऽत्रोद्धृताऽस्ति ।

(इति भणितानन्तरं रावणश्चिन्तयति -) कथं कालकूटवृष्टिः ? ।

दत्ताति रागिणी प्राणानादत्ते द्वेषिणी पुनः ।
रागो वा यदि वा द्वेषः कोऽपि लोकोत्तरः स्त्रियाः ॥ १२ ॥

अन्यत ।

........................] मन्यथाऽभिदधाति ।

शरनिकरं वर्षत्यपि भगवति मदने घनेऽपि च प्रेम्णि ।
प्रायेण स्त्री कथमपि धैर्यं न जहाति पुरुष इव ॥ १३ ॥

सीता - [1]अवि य जीवंतिं जइ मं अज्जउत्तो पेच्छे ता सिढिलपेम्मो हवे । [जओ-]

जम्मि विउत्ताइं पुणो जीवंताइं मिलंति मिहुणाइं ।
पेम्मम्मि तम्मि छेया किं कह वि कयायरा हुंति ? ॥ १४ ॥

रावणः - अयि स्मरनगरनागरिके ! विष्टपदृष्टिचकोरीचन्द्रिके ! शृङ्गाररसभृङ्गारकल्पामनल्पार्थामिनामेव गाथां भूयोऽप्यभिधाय सुधासारेणाभिषिञ्च श्रवणोत्पलकाननं दशाननस्य ।

(सीता सरोषमधोमुखी तिष्ठति ।)

रावणः - (सप्रमोदम्) कलकण्ठ !

देव्या वक्त्रमलाञ्छनस्तुलयति श्वेतद्युतिः पार्वणो,
वाचां पाकमपाकरोत्यलवणोदन्वत्प्रबुद्धा सुधा ।
अम्भोजानि दृशोरनश्वरविकाशानि श्रियं बिभ्रते,
कम्बुः कण्ठकलां प्रभुः कलयितुं कौटिल्यवन्ध्योदरः ॥ १५ ॥

(सीतां प्रति)

हरौ चरति चारकाश्रमतपस्विनीं तां शचीं,
भुजिष्यदयितेति यः परिरिरंसुमप्यस्तवान् ।
स्वयं स दशकन्धरो विनयवामनैराननैः,
स्तुवन् सुदति ! याचते वचनहन्तकारं त्वयि ॥ १६ ॥

त्रिजटा - [2]भट्टिणि ! कीस लंकापरमेसरो संभासणमित्तकेणावि न सम्भावीयदि ? ।

सीता - [3]तियडे ! नाहं पाविट्ठाणं पारदारियाणं संभासणं करेमि ।

१) अपि च जीवन्तीं यदि मां आर्यपुत्रः प्रेक्षेत तत् शिथिलप्रेमा भवेत् । [यतः -]
यस्मिन् वियुक्तानि पुनः जीवन्ति मीलन्ति मिथुनानि ।
प्रेम्णि तस्मिन् छेकाः किं कथमपि कृतादरा भवन्ति ? ॥

२) स्वामिनि ! कस्माद् लङ्कापरमेश्वरः सम्भाषणमात्रकेणापि न सम्भाव्यते ? ।

३) त्रिजटे ! नाहं पापिष्ठानां पारदारिकाणां सम्भाषणं करोमि ।

रावणः–देवि ! कोऽय विचारवन्ध्यो व्याहारः ? । ननु प्रथमं रावणेन मनसा परिणीताऽसि, चरमं वनेचरेण ।

सीता–(सरोषम्) [1]पडिहदोऽसि भयवदीणं रहुउलदेवदाणं पहावेण ।

रावणः–(सोपहासम्) आम जानकि ! आम, प्रतिहतोऽस्मि भगवतीनां रघुकुलदेवतानां प्रभावेण । मुग्धाऽसि दुग्धमुग्धविलोचने ! मुग्धाऽसि ।

रणभुवमधिरूढे यत्र खेलद्भुजानां,
शरणमरिकुलानां संयमो वा यमो वा ।
हरिजयमदमैत्रीक्षीवदोर्दण्डखण्डे,
विजयिनि मयि तस्मिन् का कथा देवतानाम् ? ॥ १७ ॥

सीता–[2]अरे रावण ! मा खु सुरविजयगव्वमुव्वहहि । रक्खसाणं पि भेक्खसा अत्थि ।

रावणः–(अनाकर्णितकेन कुन्तलकं प्रति)

देव्याः पयोधरभरश्चिरसंस्तुतस्य,
मध्यस्य सेवितुमुपाहितनीविवृत्तेः ।
दारिद्र्यमेष वितरन् परमुद्धतत्व-
कार्कश्ययोः [3]समुचितं चरितं व्यधत्त ॥ १८ ॥

(त्रिजटां प्रति) अनुकूलयास्मासु देवीम् ।

त्रिजटा–(अपवार्य) [4]परुक्खे सव्वं पि जाणई पडिवज्जदि ।

रावणः–अयमर्थोऽस्माभिरिदानीमपि विनिश्चितः । (सीतां प्रति) देवि ! किमद्यापि रावणस्य न प्राचीनं पुण्यमुदयमुपगच्छति ? ।

सीता–[5]रावणस्स पाईणं पुण्णं अत्थं गमिस्सदि । राहवस्स उण उदयं ।

रावणः–

यायावरेण किमनेन वनेचरेण ?,
मां स्थावरं वरमुपास्स्व [6]कुरङ्गकाक्षि ! ।
किं वा स्तुवे तव पुरश्चतुरस्थितीनां,
वैदग्ध्यसौरभवती भवती प्रकाण्डम् ॥ १९ ॥

१) प्रतिहतोऽसि भगवतीनां रघुकुलदेवतानां प्रभावेन । २) अरे रावण ! मा खलु सुरविजयगर्वमुद्वह । राक्षसानामपि भेक्खसा–प्रतिशत्रवः सन्ति । ३) समुचितं किमु न व्य° उ० । ४) परोक्षे सर्वमपि जानकी प्रतिपद्यते । ५) रावणस्य प्राचीनं पुण्यं अस्तं गमिष्यति । राघवस्य पुनः उदयम् । ६) कुरङ्गनेत्रे ! उ० ।

सीता - 'को वि जावरो को वि थावरो त्ति विवेगं लक्खणनारायपद्धई करिस्सदि ।

रावणः - (सरोषं चन्द्रहासं परामृश्य)

प्रेमावनद्धहृदयः सर्वे लङ्केश्वरः सुदति ! सोढा ।
सोढा न चन्द्रहासः पुनरयमुल्लण्ठवृत्तानाम् ॥ २० ॥

सीता - (सरोमाञ्चम्) भयवं तिहुअणविजयसिरिनिवास चंदहास ! रक्खसकर- फरिसमयिलिदाए सीदाए देहि पच्छित्तं । अवणेहि उत्तमंगं । करेहि दुक्खमोक्खं ।

रावणः - (स्वगतम्) किमिदमनात्मनीनं कर्म ? । ननु विदेहराजदुहितरि कथावशेषायां रावणोऽपि समापितप्राणितः । (प्रकाशम्) भवतु तावत् नर्मकर्मठस्य भुजिष्यस्य वैयात्यभाग्भिर्वाग्भिः । कुन्ददति ! कपितमर्मणि किमर्थममङ्गलकर्मणि श्रद्धालुरसि ? ।

त्रिजटा - भट्टिणि ! देवदापहावेण पडिहदं दे जंपिदं ।

रावणः - कुन्तलक !

सा वीरेषु प्रथमगणना दोर्भृतां सा प्रकाण्डं,
स्थाम्नां विश्वत्रयविजयिनां जानकी सैव भूमिः ।
दास्यं यस्याः स्पृहयति जगद्युद्धकण्डूभिषग्भि-
र्दोर्भिर्बद्धाञ्जलिरहरहः सोऽपि लङ्काधिनाथः ॥ २१ ॥

(सीतां प्रति)

स्मेराक्षि ! मां श्रितवती रणरङ्गमल्ल-
मालोकयिष्यसि हशा शबरं कदाचित् ।
दोर्दण्डमण्डलतृणीकृतशक्रयुद्धे,
क्रुद्धे पुनर्मयि न ते शबरो न चाहम् ॥ २२ ॥

(सीता सरोषमास्ते ।)

रावणः - (विमृश्य) कुन्तलक ! वालेयकर्णं प्रहस्तं च समादिश ।

कुन्तलकः - देव ! किमादिशामि ? ।

(रावणः कर्णे एवमेव ।)

(कुन्तलको निष्क्रान्तः ।)

रावणः - (सविनयम्)

१) कोऽपि यायावरः कोऽपि स्थावरः इति विवेकं लक्ष्मणनाराचपद्धतिः करिष्यति । २) °वृत्तीनाम् उ० । ३) भगवन् त्रिभुवनविजयश्रीनिवास चन्द्रहास ! राक्षसकरस्पर्शमलिनायै सीतायै देहि प्रायश्चित्तम् । अपनय उत्तमाङ्गम् । कुरु दुःखमोक्षम् । ४) भट्टिनि ! देवताप्रभावेन प्रतिहतं ते जल्पितम् ।

एणाक्षि ! स्मरजीवनौषधिलसल्लावण्यपुण्याकृते !,
सौभाग्यावनि ! मञ्जुभाषिणि ! दलद्बन्धूकमुग्धाधरे ! ।
अस्मिन् भृत्यलवे निवेशय दृशं हृद्यां !, प्रसीद प्रिये !,
लङ्काराज्यमुपास्य भूषय ननु स्वर्भूर्भुवोर्वैभवम् ॥ २३ ॥

सीता – [2]अहं अज्जउत्तस्स पसादेण लंकासामिणीहविय तियलोयवेहवं भूसइस्सं ।

(नेपथ्ये)

अत्रार्थे कः सन्देहः ? ।

रावणः –(सरोषम्) अरे ! कः शबरस्य लङ्काधिराज्यं सूचयति ? ।

(नेपथ्ये)

अत्रार्थे कः सन्देहः ? यत् कुम्भकर्णेन शबरः पराजीयते ।

कलकण्ठः – देव ! निशीथसमादिष्टमेव शुकनामा समाचरति ।

रावणः – त्रिजटे ! विज्ञपय देवीमस्मदर्थे ।

त्रिजटा – [3]भट्टिणि ! लंकाहिवदी जं विण्णवेदि तं पडिवज्जसु ।

सीता –(सरोषम्) [4]तियडे ! जइ एस पिसाओ कामग्गहेण अणायारमायरदि ता किं तुमं पि तहा ? । सीता खु अहं न राहवं विणा सिविणे वि अवरमहिलसामि ।

सीता – [5]सुगनासेण किं कहिदं ? ।

त्रिजटा –[6]अद्धकहिदे भट्टिणा निवारिदो एस, तदो मए वि परमत्थो न विन्नाओ ।

रावणः – त्रिजटे ! अस्मदनुकूलं किमपि मैथिली मन्त्रयते ? ।

त्रिजटा – [7]अध इं ? ।

रावणः –(अपवार्य सप्रमोदम्) कलकण्ठ ! फलितमिव निशीथसमादिष्टं कपटनाटकम् ।

(नेपथ्ये)

[8]अज्ज ! कीस मं मालेध ?, मिल्लेध मं, न पुणो इह समागमिस्सं ।

रावणः – अरे ! कोऽयं प्रलपति ? ।

१) लसद्द° उ० । २) अहं आर्यपुत्रस्य प्रसादेन लङ्कास्वामिनीभूत्वा त्रैलोक्यवैभवं भूषयिष्यामि । ३) भट्टिनि ! लङ्काधिपतिः यद् विज्ञपयति तत् प्रतिपद्यस्व । ४) त्रिजटे ! यदि एष पिशाचः कामग्रहेण अनाचारमाचरति तत् किं त्वमपि तथा ? । सीता खलु अहं न राघवं विना स्वप्नेऽपि अपरमभिलषामि । ५) शुकनासेन किं कथितम् ? । ६) अर्द्धकथिते भर्त्रा निवारित एषः, ततो मयाऽपि परमार्थो न विज्ञातः । ७) अथ किम् ? । ८) आर्य ! कस्माद् मां मारयथ, मुञ्चत माम् , न पुनरिह समागमिष्यामि ।

(ततः प्रविशति कुन्देन विधृतसन्दानितो वानरः ।)

रावणः–अरे कुन्द ! किमिदम् ? ।

कुन्दः–देव ! लङ्कारक्षकेण वज्रायुधेन शबरप्रणिधिरयं प्रेषितः ।

रावणः–अरे बलीमुख ! किमर्थं लङ्कायां भ्राम्यसि ? ।

वानरः–(सकम्पम्) भट्टा ! सुग्गीवेण शीदापासं पेसिदे हगे ।

रावणः–किमर्थम् ? ।

वानरः–कुमालकुम्भकण्णेण लामस्स सिरं कट्टिदं, तदो दे लावणाणुसलणं उचिदं ति कहिदुं पेसिदे हगे ।

रावणः–(सरोपमिव) किमर्थं कुम्भकर्णपराक्रमशशाङ्कस्य कलङ्कपङ्कशङ्काजनकं शबरशिरःखण्डनं सदसि प्रपञ्चयसि ? । (कलकण्ठं प्रति) औचितीनदीष्णबुद्धिरिव कपिकेतुः । (वानरं प्रति) अरे ! सर्वकर्मीणबुद्धिनाऽपि कपिकेतुना वनेचरावनुसृतौ ? ।

वानरः–खमेदु एगं अवलाधं कविवइणो लंकापलमेसले ।

रावणः–न वयमात्मीयानां कुम्भदासानामपराधांश्चेतसि व्यवस्थापयामः ।

सीता–हा अज्जउत्त ! हा भुवणेक्कमल्ल ! कहिं सि ? देहि मे पडिवयणं । (मूर्च्छामभिनयति ।)

त्रिजटा–(अपवार्य) पियसहि ! कीस आउला भवसि ? मायाविणो रक्खसा, ता निरूवेहि पज्जवसाणं ।

रावणः–(आकाशे) अरे पिङ्गलक ! वराको वनेचरः किमर्थं कुमारेण कबन्धावशेषः कृतः ? । नियन्त्र्य कथं नास्माकमुपनीतः ? ।

(प्रविश्य)

पिङ्गलकः–देव ! लघीयान् वनेचरो नियन्त्र्य समानीतोऽस्ति ।

(ततः प्रविशति बद्धो लक्ष्मणः ।)

रावणः–अरे शबर ! प्रत्यभिजानासि युवतिमेताम् ? ।

लक्ष्मणः (सबाष्पम्) देव ! प्रत्यभिजानामि रामभद्रकलत्रमेताम् ।

सीता (सबाष्पम्) तियडे ! वच्छं लक्खणं पिक्खिय दाणि अहं सुहेण जहासमीहिदं करइस्सं ।

---

१) भर्त्तः ! सुग्रीवेण सीतापार्श्वं प्रेषितोऽहम् । २) कुमारकुम्भकर्णेन रामस्य शिरः कर्तितम्, ततस्ते रावणानुसरणं उचितं इति कथयितुं प्रेषितोऽहम् । ३) क्षमयतु एकं अपराधं कपिपतेः लङ्कापरमेश्वरः । ४) हा आर्यपुत्र ! हा भुवनैकमल्ल ! कुत्रासि ? देहि मे प्रतिवचनम् । ५) प्रियसखि ! कस्मादाकुला भवसि ? मायाविनो राक्षसाः, तद् निरूपय पर्यवसानम् । ६) त्रिजटे ! वत्सं लक्ष्मणं प्रेक्ष्य इदानीं अहं सुखेन यथासमीहितं करिष्ये ।

रावणः– अरे वनेचर! यदि जीवितमभिलषसि तदानीमनुकूलय जानकीं लङ्कापतौ।

लक्ष्मणः–(प्रणम्य) आर्ये! प्रयच्छ मे प्राणभिक्षाम्। अनुतिष्ठ यदादिशति लङ्केश्वरः।

सीता–(वामाक्षिस्फुरणमभिनीय स्वगतम्) [1]ण संभवदि कुंभयण्णेण रहूणं पराभवो। एदं पि असंभावणिज्जं जं लक्खणो जीविदमेत्तनिमित्तं जाणइं अणायारे पयट्टावेइ। ता नूणं रक्खसपवंचो एस। भोदु दाव। (प्रकाशम्) न तुमं लक्खणो जं जीविदमेत्तनिमित्तं जाणइं अणायारे पयट्टावेसि। अहं पि न जाणई जइ लक्खणवयणेण रक्खसं अहिलसामि।

रावणः–(स्वगतम्) कथमद्यापि वनेचरानुरागग्राहं न शिथिलयति?। भवतु। (प्रकाशम्) अरे कुन्द! मुञ्च मुञ्च एनं वराकं वनौकसम्। (पुनः पिङ्गलकं प्रति) शबरमप्येतं कारायां क्षिप। (पुनरपवार्य) त्रिजटे! वनेचरविनाशशोकेन कमप्यमङ्गलमादधाना जानकी प्रयत्नतो रक्षणीया। वयमपि प्रपञ्चान्तरं किमपि रचयितुं प्रयतामहे।

(इति निष्क्रान्ताः सर्वे।)

॥ चतुर्थोऽङ्कः ॥



१) न सम्भवति कुम्भकर्णेन रघूणां पराभवः। एतदपि असम्भावनीयं यद् लक्ष्मणः जीवितमात्रनिमित्तं जानकीं अनाचारे प्रवर्तयति। तद् नूनं राक्षसप्रपञ्च एषः। भवतु तावत्। न त्वं लक्ष्मणः, यद् जीवितमात्रनिमित्तं जानकीं अनाचारे प्रवर्तयसि। अहमपि न जानकी यदि लक्ष्मणवचनेन राक्षसं अभिलषामि।

[पञ्चमोऽङ्कः ।]

(ततः प्रविशति बिभीषणः कुन्दश्च ।)

बिभीषणः—ततस्ततः ? ।

कुन्दः—अनन्तरं सुग्रीवरूपधारी हनूमद्वेषेण शुकनासेनानुगम्यमानः प्रहस्तो रामस्य कृतकं सतूणीरं कोदण्डं सीताया दर्शितवान्, इदमभिहितवांश्च—व्यापादितः कुम्भकर्णेन रामः । उपस्थितोऽहं लङ्कापतिम् । त्वमपि दशग्रीवाग्रहं समर्थयेः । अनुभवतु जीवितं कुमारो लक्ष्मणः । कालज्ञता हि नाम परमो विवेकः ।

बिभीषणः—ततः किमाचचार वैदेही ? ।

कुन्दः—नियन्त्रितभुजस्य सौमित्रेर्जीवितं परां त्रपामावहति । अस्मच्चिन्तायां तु कस्त्वमसि ? (इत्यभिधाय उद्बन्धनार्थं वैदेही परिकरबन्धमकरोत् ।)

बिभीषणः—अहो ! साहसातिरेकः ।

[**कुन्दः**—] ततः किमपि कर्णे कथयित्वा वैदेहीं त्रिजटा स्वास्थ्यमानीतवती ।

बिभीषणः—सुग्रीवप्रणिधेर्वानरस्य रूपं कः कृतवान् ? ।

कुन्दः—वालेयकर्णः । सौमित्रिरूपं तु प्रहस्तः ।

(नेपथ्ये)

हञ्जीरस्खलदंह्रिरानतमुखः शक्रोऽपि सान्तःपुरः,
पौराणां स पुरः पुरा श्लथकचो बभ्राम यत्रासकृत् ।
आः ! कालस्य हतस्य तस्य वशतः सैषाऽपि लङ्कापुरी,
प्रत्यर्थिप्रतिरोधबद्धनिखिलद्वाराऽधुना वर्त्तते ॥ १ ॥

बिभीषणः—कथमयमार्यो विषीदति मारीचः ? ।

(प्रविश्य)

मारीचः—कुमार !

लोकः संवृतहेममण्डनविधिर्नाट्यस्य शिक्षाभुवो
निस्तालश्रुतयः, स्थितः स मधुरः सर्वत्र गीतध्वनिः ।
प्राकारो भटसङ्कुलः, प्रतिगृहं प्रत्यर्थियात्राकथा,
देवे सत्यपि रावणे कथमिमां पुष्णाति लङ्का दशाम् ? ॥ २ ॥

बिभीषणः—लङ्कोपरोधमाकर्ण्य किमाचरति निशाचरपतिः ? ।

मारीचः—एष प्रमोदमेदुरान्तःकरणः कलकण्ठ-त्रिजटाभ्यां सह मैथिलीकथां प्रथयन्नास्ते ।

---

१) पौराणां पुरतः उ० ।

बिभीषणः–(सखेदम्) लङ्कोपरोधेऽप्यविषादिनी दशा दशाननस्य ? । भवतु तावत् । एहि समयोचितं किमपि देवं विज्ञपयामः । (इति परिक्रामन्ति ।)

(ततः प्रविशति रावणः कलकण्ठस्त्रिजटा च ।)

रावणः–त्रिजटे ! सीतां प्रति निःप्रत्याशीभूतोऽस्मि ।

त्रिजटा–[1]अदिचदुरा खु सीदा जाणादि सव्वं पि मायापयोगं । जाव सच्चकं ज्जेव वणेयरो न विवज्जदि न दाव भट्टिणं अणुसरदि ।

रावणः–

आधाय सर्वसुभगां सुमेधसा वेधसा जनकतनयाम् ।
सामग्री न गुणानामियं मृषोक्ता श्रुतिर्विहिता ॥ ३ ॥

[[2]कलकण्ठः–देव !

रसः क्वापि क्वचिद् गन्धो रूपं क्वचन सुन्दरम् ।
रसो गन्धश्च रूपं च नारङ्गे त्रितयं स्थितम् ॥ ४ ॥

चलकमलविलासाभ्यासिनी नेत्रपत्रे,
दशनवसनभूमिर्बन्धुजीवं दुनोति ।
स्मरभरपरिरोहत्पाण्डिमारूढगूढ-
द्युतिविजितमृगाङ्का मोदते गण्डभित्तिः ॥ ५ ॥

अपि च–

वैदेहीपदयुगलीं दृष्टवती भगवती न खलु लक्ष्मीः ।
कथमपरथा निवासप्रीतिं पङ्केरुहे कुर्यात् ? ॥ ६ ॥

उपेक्ष्य लवणक्षयं, चिरमपास्य तीव्रं तपो,
निरुध्य चपलं मनः, प्रतिनिषिध्य कर्मान्तरम् ।
विरञ्चिरुपदीविधौ चतुरबुद्धिरिद्धौजसं,
दशास्यमु]पसेवितुं घटितवान् विदेहात्मजाम् ॥ ७ ॥

बिभीषणः–(सभयम्) देव ! [किमपि] विज्ञपयितुकामोऽस्मि ।

रावणः–[विज्ञपय] । त्रिजटे ! जानकीसपर्यासुखमनुभव ।

(त्रिजटा निष्क्रान्ता ।)

बिभीषणः–(सविनयम्) देव !

---

१) अतिचतुरा खलु सीता जानाति सर्वमपि मायाप्रयोगम् । यावत् सत्यमेव वनेचरो न विपद्यते न तावत् स्वामिनं अनुसरति । २) अत्रान्तरे मूलादर्शसत्कं चतुर्णवतितमं पत्रं नष्टमस्तीत्यतस्तत्स्थानपूर्तिरूहानुसारेणात्र विहिताऽस्ति ।

एकस्यैव वनेचरस्य कपयः सर्वेऽपि यत् पत्तयो-
ऽभूवन् वीरमतल्लिकाः प्रतिमुहुस्तन्मेऽन्तरुल्लिख्यते।
विश्वेऽप्युत्सवहेतवो न विषयः, कालो हि वैचित्र्यभाग्,
भ्रातः! शान्तिमुपैहि, नन्दतु चिरं सोऽयं कनिष्ठो जनः ॥ ८ ॥

रावणः – (साश्चर्यम्)

यद्रक्षस्तटपृष्ठहृष्टरदनं[1] कान्तं निरीक्ष्य क्षणं,
चक्षुः कोपकडारमन्यकरिणीभ्रान्त्या बभूवाऽभ्रमोः।
कैलासोद्धरणव्रणस्थपुटितस्कन्धस्य तस्याऽऽहवे,
लङ्केन्द्रस्य भयं वयं वनचरात् सम्भाव्य रोमाञ्चिताः ॥ ९ ॥

अपि च वत्स!

तामेतां दधते स जिह्मगपतिः कश्चिद् द्विजिह्वः क्षमां,
यादः कोऽपि स कच्छपोऽथ पशवस्ते केऽपि दिग्दन्तिनः।
वीराद्वैतकथां तथापि वहते नाथः क्षपाचारिणा-
मित्थं यः सततं विषीदति स किं साध्यो द्विषां रावणः? ॥ १० ॥

मारीचः – (प्रणम्य)

देव! प्रसीद भव सर्वजनीनबुद्धि-
र्नानात्मनीनमनुतिष्ठति तुन्दिलश्रीः।
वैरङ्गिकं त्रिजगतो विजहीहि कर्म,
शर्माणि संश्रयतु शाश्वतिकानि लङ्का ॥ ११ ॥

रावणः – (साहङ्कारम्) आर्य!

मा भैषीरधिसङ्गरं वनचरं व्यापादयिष्ये, स वा
हन्यान्मां, धिगमङ्गलं, न धिगथो, व्यापत्तिरप्युत्सवः।
मूर्द्धानः समिधः कृताः मुरजिता शस्त्रानलस्याऽऽहवे
मत्प्रेम्णा, तदिदं विदेहतनया पश्चादपि ध्यास्यति ॥ १२ ॥

बिभीषणः – (अपवार्य) प्रतिहतममङ्गलम्, शिवतातिरस्तु प्रतिहतजगत्त्रयदुरितान्तिर्देवः शान्तिर्निशाचरकुलस्य।

रावणः – किञ्च –

वेश्मन्यायोजितो येन हरिर्मातङ्गकर्मसु।
पौलस्त्यस्याऽऽहवे मल्लः कस्तस्याऽपूर्ववेधसः? ॥ १३ ॥

---

१) °स्तटपृष्ठघृष्टरदनं उ०।

विभीषणः – देव ! निर्व्याजवीरव्रताम्भःप्रवर्द्धिता कीर्तिप्रतानिनी किमर्थं शिरसा-ममङ्गलाशंसनकुलिशेन निर्मूलमुन्मूल्यते ? ।

रावणः –

सौखप्रसुप्तिकविधौ धिषणो नदीष्णः,
सौस्नातिकः स किल दैत्यमहत्तरश्च ।
लालाटिकास्तदपरे ग्रहराशि-तारा,
यस्याप्रियङ्करममुष्य किमस्तु मूर्ध्नाम् ? ॥ १४ ॥

अपि च वत्स ! विचित्राभिप्रायो जनः –

कैलासोद्धरणं तथा न, न तथा दर्पापहारो हरे-
र्नाप्युत्कन्धरहैहयेश्वरभुजादम्भोलिभङ्गस्तथा ।
सीताप्रेमविसंस्थुलो दशमुखः स्वैर्मूर्द्धभिर्मेदिनी-
खण्डं मण्डितवान् तदेतदधिकं कीर्त्यै यथा भाति नः ॥ १५ ॥

कलकण्ठः – सर्वकर्मीणबुद्धेर्देवस्य न नाम परैः किमप्युपदेष्टव्यमस्ति, किन्तु रिपुपराक्रमेण चमत्कृतहृदयः कुमारः पुनः पुनरेवं देवं विज्ञपयति ।

रावणः – (साक्षेपम्) इत्थं किमिदमरावणोचितं विपञ्चयसि ? । ममापि नाम दशकन्धरस्य रिपवः ? ।

अम्भोदाः ! सप्तकृत्वः स्थगयत निखिलं मण्डलं चण्डभानो-
र्देवः श्रीराक्षसेन्द्रो न खलु विषहते पादसंस्पर्शमेषः ।
इत्थं यस्य प्रयाणे तुमुलयति दिशः स्वर्गिणां चाटुकार-
स्तं योद्धुं यातुधानाधिपमधिमनसं कोऽभिकाङ्क्षेत् सकर्णः ?॥ १६॥

(पुनः सखेदम्) यदि वा सौविदल्ल !

लूनं वनेचरशिशोर्न शिरो, न गाढ-
मासादितो जनकजापरिरम्भकेलिः ।
दम्भोलिकोणकिणचन्द्रकसिध्मलानां,
दोष्णां पुरन्दरजयेन क एष दर्पः ? ॥ १७ ॥

कुन्दः – (सविनयम्) खर - दूषण - त्रिशिरःप्राग्रहराणि चतुर्दशविद्याधरसहस्राणि भुजमात्रसहायो व्यापादयति यः स लोचने निमील्य रिपुर्देवेन विचिन्तनीयः ।

रावणः – (सोपहासम्) आम महाबुद्धे कुन्द ! आम, खर - दूषण - त्रिशिरःप्राग्रहराणि चतुर्दशविद्याधरसहस्राणि भुजमात्रसहायो व्यापादयति यः स लोचने निमील्य देवेन रिपुर्विचिन्तनीयः । (पुनः सविषादम्)

कियदिदमिति बुद्ध्या दर्पकण्डूलबाहुः,
सुरजयकथयाऽपि[1] व्रीडमालम्बते यः ।
मनुजभुजकलाभिर्भाप्यते सोऽपि लङ्का-
पतिरहह ! विपाकः कर्मणां कोऽप्यचिन्त्यः ॥ १८ ॥

(पुनः सवितर्कम्)

श्लाघ्यः सैष[2] यदर्थमेवमनिशं सीता परिक्लाम्यति,
क्रूरस्य प्रणयादमुष्य खलु सा नास्मभ्यमुत्ताम्यति ।
व्यारोहत्परितोष-रोषविकसद्रोमाश्वसान्द्रीभव-
द्दोष्णां पश्य वनेचरः कथमभूद् वन्द्यश्च निन्द्यश्च नः ? ॥ १९ ॥

मारीचः – (प्रणम्य) देव ! भवतु सफलप्रार्थनः कुमारो बिभीषणः । मुच्यतां वैदेही । उपशाम्यन्तु सवनौकसो वनचारिणः ।

रावणः – (सरोपम्) इदमपरमार्यस्य विश्रसालीलायितम् । रावणः खल्वहमनास्पदं सवनौकसां वनेचरडिम्भानां पराक्रमस्य ।

बिभीषणः – (सखेदम्)

डिम्भत्वं वनचारिणोः खरकुलात् प्रत्येति कोऽन्यस्तयो-
र्वाली यं विनयं व्यधत्त समरे तत्राब्धयः साक्षिणः ।
पार्ष्ण्या मौलिकिरीटकुट्टनमहं देवः स्वयं दृष्टवान्,
भ्रातः ! शान्तिमुपैहि सान्त्वय नय-स्थामोद्धुरौ तौ नरौ ॥ २० ॥

रावणः – (सरोपम्) अरे कुलाङ्गार ! प्रतिपक्षचार ! प्रथितोपहास ! बान्धवाभास ! मर्मोद्घट्टनाभिर्दशकन्धरमुल्लुण्ठयसि ? । एष ते चन्द्रहासेन मूर्द्धानं पातयामि ।

(इति सिंहासनादुत्थानं नाटयति ।)

मारीचः – (ससम्भ्रमम्) देव ! किमिदम् ? । कोऽयं कनीयसि भ्रातरि चन्द्रहासपरामर्शप्रयासविप्लवः ? ।

कलकण्ठः – देव ! सिंहासनमलङ्क्रियताम् ।

रावणः – (उपविश्य) अरे बान्धवाधम ! सत्वरं शबरमनुसर । मास्म लङ्कायामतः परं तिष्ठ ।

बिभीषणः – न भाव्यमन्यथा भवति, तदहं रक्षोराजन्यबीजरक्षार्थं राममनुसरामि । (इति विचिन्त्य निष्क्रान्तः ।)

रावणः – (साक्षेपम्) आर्य ! त्वमपि स्वं नियोगमशून्यं कुरु । कुन्द ! प्रहस्तमाकारय ।

---

१) सुरविजयकथाभिर्व्रीड° उ० ।   २) सैव उ० ।

(उभौ निष्क्रान्तौ ।)

रावणः—(सखेदमिव)

व्याधूतस्फटिकाद्रिसन्धिनिलयानासूत्रयद्भिः पृथून्,
प्रीतिर्यैर्वचसामधाम विदधे स्वःस्वैरिणीनां हृदि ।
वैदेहीपरिरम्भणव्यसनिनो लङ्कापतेः साम्प्रतं,
दोस्तम्भाः शबरेऽपि पश्य दधते ते स्थामदुःस्थां स्थितिम् ॥ २१ ॥

[कस्कोऽत्र भोः ! ?]

(प्रविश्य)

प्रहस्तः—एषोऽस्मि ।

रावणः—(साक्षेपम्) प्रहस्त ! प्रगुणय विमानराजम्, येन सवनौकसां वनेचराणां शोणितजलेन चन्द्रहासधारालतामधिगमयामः ।

(प्रहस्तो निष्क्रान्तः ।)

(प्रविश्य सम्भ्रान्तो वैनतेयः रावणस्य कर्णे एवमेव ।)

रावणः—(सावहेलम्) किमेकाकिना विभीषणेन ? । कुम्भकर्णोऽपि शबरमुपसर्पतु । रावणः खल्वहम् ।

कल्पान्तताण्डविततापकलापचण्ड-
मार्तण्डमण्डलविडम्बि विलम्बि चक्रम् ।
दोष्ण्यत्र यावदमरीकबरीकृतान्ते,
तावत् स पक्कणचरः शबरस्तपस्वी ॥ २२ ॥

वैनतेयः—प्रथमेऽपि दर्शने वनेचरो बिभीषणाय लङ्काधिराज्यं प्रतिज्ञातवान् ।

रावणः—(सावहेलम्) किमिदमसाम्प्रतम् ? । न नाम वनेचरो बिभीषणाय लङ्काधिराज्यं दातुं प्रभविष्णुः ।

(नेपथ्ये)

धृत्वा करे दशमुखं सविमानराजं,
क्रीडाशकुन्तमिव पञ्जरभाजमाजौ ।
बभ्राम यो जलधिकूलवनस्थलीषु,
तस्याहमेष तनयो ननु चन्द्रराशिः ॥ २३ ॥

रावणः—(सरोषम्) अरे ! क एष दशकन्धरं मर्मणि स्पृशति ? ।

(प्रविश्य)

प्रतीहारः—देव ! वनेचरप्रेषितो वालितनयः सन्देशहरो द्वारि वर्तते ।

१) प्रीतीर्या वचसा° उ० ।

(रावणो विमृश्य वैनतेयस्य कर्णे एवमेव ।)

(वैनतेयो निष्क्रान्तः ।)

(प्रविश्य चन्द्रराशिः प्रणमति ।)

रावणः—(साक्षेपम्) अरे बलीमुख ! किमेष लङ्कामधिगतवानसि ? ।

चन्द्रराशिः—इदमादिशन्ति तुभ्यं रामभद्रपादाः ।

रावणः— (चन्द्रहासं परामृश्य सखेदम्)

कोऽप्यस्ति काननचरः स च रावणाय,
क्रुद्धः समादिशति दूतमुखेन कृत्यम् ।
श्रीचन्द्रहास ! मुषितेन्द्रवधूविलास !
दृष्टस्त्वया हतविरिञ्चिविचारसारः ॥ २४ ॥

चन्द्रराशिः—

तस्य प्रियां दशरथस्य वधूं विदेह-
भर्तुः सुतामभिरिरंसु पिशाचतोकम् ।
श्रीचन्द्रहास ! मुषितेन्द्रवधूविलास !
दृष्टस्त्वया हतविरिञ्चिविचारसारः ॥ २५ ॥

रावणः—(सक्रोधम्) अरे ! पुनरेवेदं व्याहर ।

(चन्द्रराशिस्तदेव पठति ।)

रावणः—

हित्वा वैनयिकं प्रयात रिपुतां, पुष्णीत रोधं पुरे,
वाचालास्त, विधत्त दूतललितं, स्वेच्छाऽपराधेषु वः ।
सर्वस्यापि विकर्मणो दिविषदां कौपीनदीक्षागुरुः,
प्रायश्चित्तमसावसिर्घटयिता श्रीचन्द्रहासो रणे ॥ २६ ॥

(प्रविश्य)

राक्षसः—भट्टा ! हणुअंतपिया पवणंजए दारि चिट्ठदि ।

रावणः—शीघ्रं प्रवेशय ।

(राक्षसो निष्क्रान्तः ।)

(प्रविश्य पवनञ्जयः प्रणमति ।)

चन्द्रराशिः—(प्रत्यभिज्ञाय स्वगतम्) हनूमत्पिता रावणमनुसरतीति महदरिष्टं वानरवंशस्य ।

पवनञ्जयः—(सदैन्यम्)

---

१) किमर्थं उ० । २) भर्त्तः ! हनूमत्पिता पवनञ्जयः द्वारि तिष्ठति ।

यद् भग्नं विपिनं, धनुर्द्धरकलादक्षो यदक्षो हतः,
शिक्षां लम्भयतः क्षपाचरपतेर्येन्मूर्ध्नि दत्तं पदम् ।
यद् वेश्मानि परःशतानि शिशुना क्षुण्णानि कापेयतः,
तत् क्षन्तव्यमशेषमेष पुरतस्ते देव ! बद्धोऽञ्जलिः ॥ २७ ॥

कलकण्ठः—पवनस्य सेवामनुस्मरता देवेन हनूमतोऽपराधवैशसं विस्मरणीयम् ।

रावणः—अनभिज्ञा वयं बाल्यचापल्यप्रभवानां पदातिपृथुकदुर्ललितानाम् ।

पवनञ्जयः—प्रसीदतु देवः ।

रावणः—गृहाण प्रसादम् । (पुनः प्रतीहारं प्रति) वराहतुण्ड ! मदाज्ञया समादिश कुमारं कुम्भकर्णम्, यथा—पवनञ्जयं किष्किन्धाधिराज्ये त्वरिततरमभिषिञ्च ।

पवनञ्जयः—देव ! महाप्रसादः । (इत्यभिधाय सप्रतीहारो निष्क्रान्तः ।)

चन्द्रराशिः—(सभयमात्मगतम्) किमिदं सुग्रीवसाम्राज्यस्य महदरिष्टमुपस्थितम् ? । न नाम किमप्यसाध्यं कुम्भकर्णपराक्रमस्य । तदर्थं त्वरिततरं गत्वा कपिकेतवे विज्ञपयामि ।

रावणः—(सोपहासम्) महावीरतनय ! किमादिशन्ति मह्यं रामभद्रपादाः ? ।

(पुनर्विमृश्य कलकण्ठस्य कर्णे एवमेव ।)

(कलकण्ठो निष्क्रान्तः ।)

चन्द्रराशिः—(स्वगतम्) किष्किन्धाधिराज्यस्य यद् भाव्यं तद् भवतु । अवष्टम्भत्यजनं पुनः कपिकुलं मलिनयति । (प्रकाशम्) इदमादिशन्ति तुभ्यं रामभद्रपादाः—

रक्षोवंशभुवामकृत्यकरणं वेषो न दोषस्ततः,
सत्यं ते वयमन्यदारहरणं नानौचितीं ब्रूमहे ।
सीतां मुञ्च, शराः खरान्वयमुषो विश्रान्तिमातन्वता-
मस्तु स्वस्ति, निशाचरेषु वहतां मन्दोदरी मण्डनम् ॥ २८ ॥

रावणः—

अस्तु स्वस्ति, निशाचरेषु वहतां मन्दोदरी मण्डनं,
वैदेहीपरिरम्भनिर्भरभुजो धत्तां मुदं रावणः ।
सन्तु म्लेच्छशिशोः सवानरचमूचक्रस्य रक्तासवै-
र्लङ्काक्रीडगृहेषु पङ्कजदृशामापानकेलिक्रमाः ॥ २९ ॥

चन्द्रराशिः—(साक्षेपम्)

सन्तु म्लेच्छशिशोः सवानरचमूचक्रस्य पण्यस्त्रियां,
लङ्काक्रीडगृहेषु सीधुसलिलैरापानकेलिक्रमाः ।
पौलस्त्यस्य शिरोभिरस्तु दशभिः सौमित्रिपत्रिक्षतैः,
किष्किन्धापुरगोपुरेषु विगलद्रक्षोरणं तोरणम् ॥ ३० ॥

(प्रविश्य)

चेटी - भट्टा[1] ! सीदादेवी विन्नवेदि ।

रावणः - (ससम्भ्रमम्) मालतिके ! किमादिशति देवी ? ।

चेटी - न[2] सक्केमि विरहहुयाससंतावं सहिदुं । तुरिदं समागच्छिय निव्वावेदु मे सरीरलट्ठिं अज्जउत्तो ।

चन्द्रराशिः - (सखेदमात्मगतम्) केयमुत्पातपरम्परा ? । यदि रावणविरहानलाभितापं [सोढु]मनलम्भविष्णुर्जानकी, वृथा तर्हि रामस्य समरसंरम्भः ।

रावणः - (सादरम्) एते वयमागता एवेति गत्वा ज्ञापय देव्यै ।

(चेटी निष्क्रान्ता ।)

रावणः - (सौत्सुक्यमिव) चन्द्रराशे ! अस्मद्विरहकातरा चिरं परिसोढुमनलम्भूष्णुर्मान्मथीं व्यथां मैथिली । संवृणु वचनरचनाप्रागल्भीम् । शुश्रूषवो वयं वैदेहीचरणाम्भोजद्वयीम् ।

(नेपथ्ये)

इत इतो देवी ।

रावणः - (ससम्भ्रमम्) कथं जानकी पादविहारक्लेशमनुभवति ? ।

आरोहन्ति दुरारोहं मार्गमुज्झन्ति दूरतः ।
योषितः कामिनामर्थे शाखिनामिव वीरुधः ॥ ३१ ॥

(ततः प्रविशति त्रिजटादत्तहस्तावलम्बा सीता कलकण्ठप्रभृतिकश्च परिवारः ।)

कलकण्ठः - इत इतो देवी ।

रावणः - (ससम्भ्रममुत्थाय) देवि ! कोऽयमननुभूतपूर्वः पादविहारक्लेशोपद्रवः ? ।

सीता - (सरोषम्) अज्जउत्त[3] ! सुहिदो सि, न याणासि विरहानलपीडं ।

रावणः - सिंहासनं तावदलङ्क्रियताम् ।

(सीता रावणस्य सिंहासनार्द्धे समुपविशति ।)

रावणः - देवि ! तव वल्लभप्रेषितेनामुना चन्द्रराशिना कालक्षेपमादधानेन वयमपराधिनः कृताः ।

---

१) भर्त्तः ! सीतादेवी विज्ञपयति । २) न शक्नोमि विरहहुताशसन्तापं सोढुम् । त्वरितं समागत्य निर्वापयतु मे शरीरयष्टिं आर्यपुत्रः । ३) आर्यपुत्र ! सुखितोऽसि, न जानासि विरहानलपीडाम् ।

सीता–मह[1] वल्लहेण दसकंधरेण एस पेसिदो ? ।

रावणः–(विहस्य) तव वल्लभेन वनेचरेणैष प्रेषितः ।

सीता–पडिहदममंगलं[2] ।

कलकण्ठः–अभिजात्येन वनेचरो वल्लभः । परमानुरागिणा हृदयेन पुनर्बाल्यात् प्रभृति लङ्कापतिरेव देव्या वल्लभः ।

सीता–(चन्द्रराशिं प्रति) वच्छ[3] ! कीस रामभद्दो अत्ताणयं मह कारणे संतावेदि ? । मए बालकालादो परूढेहिं मणोरहसदेहिं अज्जउत्तो लंकाहिवदी पाविदो । अओ परं सुविणे वि न अन्नं अहिलसामि । ता गच्छ तुमं । संबोहिय पडिनियत्तावेहि रामभद्दं ।

चन्द्रराशिः–(स्वगतम्) अपि नाम जानकी पण्याङ्गनाचरितमाचरेत् ? । व्यक्तमिदं कैतवं किमपि । (प्रकाशम्) न खलु त्वं जनकस्य तनया यदि रामभद्रमपहाय रावणमभिलषसि ? ।

सीता–आम[4] चंदरासे ! आम, नाहं जणयस्स तणया । अज्जउत्तस्स पसादेण अउरवं मे दिव्वं सरीरं जादं ।

रावणः–अस्थानमिदमवरोधवधूनाम् । व्रजत यूयमाक्रीडसौधतलम् । प्राप्ता एव वयमेते ।

(सीता सपरिकरा निष्क्रान्ता ।)

रावणः–(सोपहासम्) चन्द्रराशे[5] ! जानकीजानिर्देवो रामभद्रः किमपरमादिशति ? ।

चन्द्रराशिः–(सावष्टम्भम्) जानकीजानिर्देवो रामभद्र इदमपरमादिशति ।

उदस्तः कैलाशो यदथ, शतमन्योऽर्थपहृतः
स्मयः सङ्ग्रामे यत्, तदिह ननु साक्षी कथय कः ? ।
प्रतीमो निःशेषं खरकुलनिवापप्रतिभुवां
शराणां रे रक्षस्त्वमसि परिसोढा यदि युधि ॥ ३२ ॥

(प्रविश्य)

प्रतीहारः–देव ! प्रयातः कुमारकुम्भकर्णः किष्किन्धाधिराज्ये पवनञ्जयमभिषेक्तुम् ।

---

१) मम वल्लभेन दशकन्धरेण एष प्रेषितः ? । २) प्रतिहतममङ्गलम् । ३) वत्स ! कस्माद् रामभद्रः आत्मानं मम कारणे सन्तापयति ? । मया बाल्यकालात् प्ररूढैर्मनोरथशतैः आर्यपुत्रो लङ्काधिपतिः प्राप्तः । अतः परं स्वप्नेऽपि न अन्यं अभिलषामि । तद् गच्छ त्वम् । सम्बोध्य प्रतिनिवर्त्तय रामभद्रम् । ४) आमं चन्द्रराशे ! आमम्, नाहं जनकस्य तनया । आर्यपुत्रस्य प्रसादेन अपूर्वं मे दिव्यं शरीरं जातम् । ५) चन्द्रराशे ! अर्पयिष्यामो जानकीम् । जानकी° उ० ।

रावणः–फलितं तर्हि सुमेधसः सुग्रीवस्य वनेचराराधनव्रतम्। (पुनः सोपहासं चन्द्रराशिं प्रति) इदं विज्ञपय गत्वा जानकीजानेः, यथा–उपनेष्यामहे भवत्प्रेमाकुलां सीताम्, असोढारः खरकुलनिर्वापप्रतिभुवां शराणां वयम्।

(चन्द्रराशिर्निष्क्रान्तः।)

रावणः–(कर्णं दत्त्वा ससम्भ्रमम्)

लङ्कायाः किमु रे! बहिः कलकलः?

प्रतीहारः–

प्राप्तो रिपुः

रावणः–(सावज्ञम्)

किं शुना-

शीरः? कोऽप्यपरो?

प्रतीहारः—

न काननचरः

रावणः—(सलज्जम्)

हुं मा पुरो व्याहृथाः।

(पुनः सविनयम्)

दोर्दण्डाः! समुपस्थितं किमपि वः पर्व त्रपापिच्छिलं,
स्मर्त्तव्योऽस्मदनुग्रहेण विजयो नैन्द्रः क्षणं सम्प्रति ॥ ३२ ॥

(प्रविश्य सम्भ्रान्तः)

शुकनाशः–देव! राम-कुम्भकर्णयोः शक्रजित्-सुग्रीवयोरपरेषां रक्षसां वनौकसां च महान् समरसंरम्भो वर्तते।

रावणः–(सरोषम्) किमद्यापि प्रहस्तः पुष्पकं न प्रगुणयति?।


(नेपथ्ये)

इदं प्रगुणमेव पुष्पकम्। आरोहतु देवः।

रावणः–(प्रतीहारं प्रति) दर्शय मार्गम्, येन समराय संरम्भामहे।

(इति निष्क्रान्ताः सर्वे।)

॥ पञ्चमोऽङ्कः ॥



[॥ षष्ठोऽङ्कः ॥]

(ततः प्रविशति सुषेणः ।)

सुषेणः—भो भोः प्लवङ्गमसैन्यनिवासिनः किङ्कराः! प्रवर्त्यन्तां मङ्गलानि। प्रसाध्यन्तां तोरणानि। सुभटकुञ्जरस्य रघुपतेः पराक्रमातिशयः कोऽपि वर्त्तते?।

(नेपथ्ये)

इदमखिलमनुतिष्ठामः।

सुषेणः—तर्हि जाम्बवते विज्ञपयामि। (इति परिक्रामति।)

(ततः प्रविशति जाम्बवान् चन्द्रराशिश्च।)

जाम्बवान्—समाकर्णितपूर्वया कृतमपरया कथया?, कथय तावद् भवन्तमुपलभ्य प्रथमं किमजनि रजनिचरचक्रवर्त्तिनः?।

चन्द्रराशिः—

साकूतं किमपि[1], प्रदीप्तमपरं[2], दोलायितं किञ्चन[3],
स्तब्धं किञ्चन, किञ्चन प्रहसितं, किञ्चित्त्रपापांसुरम्[6]।
किञ्चिद्विस्मितमन्यदुन्नतमवाक् किञ्चित्, किमप्युत्सुकं,
*मां व्यालोक्य दशाऽपि रावणमुखान्याप्तानि भिन्नां स्थितिम् ॥ १ ॥

सुषेणः—आर्य! वर्द्धसे, पाशैर्नियम्य सङ्गृहीतो रामभद्रेण कुम्भकर्णः।

जाम्बवान्—(ससम्भ्रमम्) पाशैर्नियम्य सङ्गृहीतो रामभद्रेण कुम्भकर्णः!।

सुषेणः—अथ किम्?।

जाम्बवान्—(सहर्षम्) स एष किष्किन्धाधिराज्येऽभिषिक्तः पवनञ्जयः कुम्भकर्णेन। सेयं रावणमनुसृतवती सीता।

चन्द्रराशिः—आर्य! सर्वमिदं पवनञ्जय-सीताविजृम्भितं दशकण्ठकपटं मह्यमादिष्टं बिभीषणेन। यथा—पवनञ्जयरूपं वैनतेयः कृतवान्, त्रिजटानुचरी मालतिका पुनः सीतारूपं विधृतवती।

जाम्बवान्—सुषेण! पुनरपि समरोदन्तं कमप्यानय।

(सुषेणो निष्क्रान्तः।)

(प्रविश्य)

वानरः—आर्य! वर्द्धसे, प्रहारपतितः शक्रजिद् देवेन कपिकेतुना सङ्गृहीतः।

जाम्बवान्—अवसिता तर्हि सुभटकथा निशाचरेषु। (पुनः साशङ्कम्) किमिति प्रमोदावसरे वामं चक्षुः स्फुरति?।

---

* मामालोक्य उ०।

वानरः-साम्प्रतं च स्वयं रावणः समरमलङ्कृतवान्।

जाम्बवान्-(सभयम्) यदि रावणः स्वयमायातवान् महांस्तर्हि समरसंरम्भः सम्भाव्यते।

चन्द्रराशिः-(सत्वरम्) आर्य! अहं समरमधिष्ठास्यामि।

(इति निष्क्रान्तः।)

(प्रविश्य सम्भ्रान्तः)

गोमुखः-आर्य! कपिकेतुः समादिशति।

जाम्बवान्-(ससम्भ्रमम्) किमादिशति?।

गोमुखः-आर्य! अत्याहितं अत्याहितम्।

जाम्बवान्-विश्रब्धमभिधीयताम्।

गोमुखः-अष्टप्राकारं चतुर्द्वारं चमूचक्रेण वलयामुखं नाम व्यूहं कारय इत्यादिशति।

जाम्बवान्-अरे वानर! अत्रार्थे यूथपतीन् प्रगुणय।

(वानरो निष्क्रान्तः।)

(नेपथ्ये)

हा वत्स! हा त्रिभुवनैकमल्ल! हा शौण्डीरकुञ्जर!।

जाम्बवान्-(सभयम्) गोमुख! किमिदम्?।

गोमुखः-(साश्रम्) दिव्यशक्त्या शक्त्या रावणेन लक्ष्मणो वक्षसि ताडितः।

जाम्बवान्-उपस्थितस्तर्हि बलीमुखवंशस्य क्षयकालः।

(ततः प्रविशति राम-सुग्रीवाभ्यां दत्तहस्तावलम्बः शक्तिसक्तवक्षा लक्ष्मणः, बिभीषण
१ अङ्ग २ अङ्गद ३ हनूमत् ४ पवनञ्जय ५ चन्द्रराशि ६ कुन्द
७ कुमुद ८ गवय ९ गवाक्ष १० प्रभृतयो वनौकसश्च।)

जाम्बवान्-(सुग्रीवं प्रति) व्यूहमध्यमध्यास्तां कुमारः।

सुग्रीवः-(ससंरम्भम्) पर्यङ्कः पर्यङ्कः।

(प्रविश्य वानरः पर्यङ्कमुपनयति)

(लक्ष्मणः सरामो निषीदति।)

रामः-(साश्रम्) हा वत्स!।

सुग्रीवः-अमात्य! व्यूहद्वाररक्षायां भामण्डलप्रभृतीन् यूथपतीनवधापय।

(जाम्बवान् गवयस्य कर्णे एवमेव।)

(गवयो निष्क्रान्तः।)

(प्रविश्य)

वानरः—आर्य ! सुषेणो विज्ञपयति—शक्रजित्-कुम्भकर्णप्रभृतीनि समरसङ्गृहीतानि वीरप्रकाण्डानि कथमासताम् ? ।

जाम्बवान्—निगडजडितानि कारय । (विमृश्य) अरे ! कपिवीराः कियन्तो विपन्नाः ? ।

वानरः—चतुर्दशायुतानि । (इत्यभिधाय निष्क्रान्तः ।)

रामः—वत्स ! किं ते बाधते ? ।

लक्ष्मणः—(मन्दस्वरम्) न किञ्चित् । (पुनरपवार्य सुग्रीवं प्रति)

वाचः स्खलन्ति, गात्राणि शुष्यन्ति, भ्रश्यति स्मृतिः ।
याति श्यामलतां दृष्टिः, श्रोतुं श्रोत्रं न काङ्क्षति ॥ २ ॥

सुग्रीवः—(ससम्भ्रमम्) जलं जलम् ।

हनूमन्तः—देव ! इदम् ।

सुग्रीवः—सर्वाङ्गीणमभिषिञ्चति ।

लक्ष्मणः—चापं चापम् ।

सुग्रीवः—किमर्थम् ? ।

लक्ष्मणः—जलोपसेकेन मनागपहृतपीडोऽस्मि ततः समरमनुसर्तुमिच्छामि ।

सुग्रीवः—साधु वीरावतंस ! साधु ।

(रामोऽङ्गानि संवाहयति ।)

लक्ष्मणः—आर्य ! अलमलं विनयातिपातेन ।

रामः—वत्स ! किं ते बाधते ? ।

(लक्ष्मणः वेदनामभिनीय तूष्णीमास्ते ।)

रामः—(साश्रम्)

धीरोत्तंस ! पराक्रमैकशरणे, धोरेय ! तेजस्विनां,
स्थाम्नां धाम !, कृतज्ञविज्ञगरिमावास !, प्रवास ! द्विषाम् ।
गम्भीर ! प्रतिपन्नवत्सल ! महात्यागिन् ! शरण्याग्रिम ! ।
ज्येष्ठे क्रन्दति बान्धवे मयि निजे दृष्ट्या प्रसीद क्षणम् ॥ ३ ॥

(पुनरुच्चैःस्वरम्) तात लक्ष्मण ! ।

लक्ष्मणः—(चेतनामास्थाय) आदिशत्वार्यः ।

रामः—(साश्रम्)

संरब्धे प्रतिपन्थिनि प्रतिदिशं वाचंयमो मास्म भूः,
सन्तप्तान् हृदयङ्गमेन वचसा सन्तर्पयाऽस्मान् क्षणम् ।

हेवाकः क स ते जगत्त्रयभयप्रत्यासदीक्षोन्मुखः?,
कोऽयं वीरमृगाङ्क! कातरकलाशाली रणानुद्यमः? ॥ ४ ॥
लक्ष्मणः–सुग्रीव! सन्धीरय आर्यम्।
सुग्रीवः–देव! कोऽयं रघुकुलविरोधी धैर्यध्वंसविप्लवः?।
लक्ष्मणः–हनूमन्! सतूणीरं चापं सूर्यहासं चोपनय।
हनूमन्तः–इदम्।
लक्ष्मणः–बिभीषण! पाणौ मे योजय।
(बिभीषणस्तथाकरोति।)
लक्ष्मणः–
भ्रातः कार्मुकदण्ड! मित्र शरधे! श्रीसूर्यहास प्रभो!,
क्षन्तव्यं विनयक्रमातिपतनं कार्यः प्रयत्नस्तथा।
आर्यः प्रीणयते यथा जनकजामस्मान् धिगात्मम्भरीन्,
प्रीणात्येव बिभीषणः खलु यथा लङ्काधिपत्यश्रियम् ॥ ५ ॥
(बिभीषणः सलज्जमधोमुखस्तिष्ठति।)
सुग्रीवः–साधु साधु उदात्तावतंस! साधु।
लक्ष्मणः–(वेदनामभिनीय बिभीषणं प्रति) शयितुमिच्छामि।
(सर्वे उत्थाय पर्यङ्के शाययन्ति।)
रामः–(ससम्भ्रमम्) वत्स! किं त्वां व्यथयति?।
लक्ष्मणः–आर्य! चरणाम्भोजप्रणयप्रवासो मां व्यथयति।
रामः–(साक्षेपम्)
धिग् वाचस्तव मङ्गलप्रशमिनीरिक्ष्वाकुवंशाशिव-
क्षोदिन्यः प्रणयप्रवासविपदं देव्यो हरिष्यन्ति नौ।
सोढव्यः स पुनर्निमील्य नयने कालः करालाकृति-
र्यावद् वत्स! करोति हेतिपटलैर्मां भस्मसात् पावकः ॥ ६ ॥
बिभीषणः–प्रतिहतममङ्गलम्।
जाम्बवान्–देव! कोऽयं त्रिभुवनामङ्गलप्ररोहहेतुर्व्याहारः?।
रामः–अमात्य!
विनाऽप्याज्ञां राज्ञः किल रघुपतेः काननमयं,
मया सार्द्धं वत्सः सहजविनयादेव समगात्।

१) °प्रमथिनी° उ०।

परे लोके यात्रां विदधतममुं यद्यहमनु-
व्रजेयं नो पूष्णः कुलमपतुलं स्यान्मलिनितम् ॥ ७ ॥

(सर्वे मन्दस्वरं रुदन्ति ।)

लक्ष्मणः – हनूमन् ! उत्थापय मां येनाऽऽर्यपादौ स्पृशामि ।

सुग्रीवः – (साश्रम्) कुमार ! शयित एव वैनयिकमाचर ।

लक्ष्मणः – बिभीषण ! करौ मे शिरसि निधेहि ।

(बिभीषणः सबाष्पं तथा करोति ।)

लक्ष्मणः –

शुश्रूषाश्रमतो जडत्ववशतश्चापल्यतो बाल्यतो,
वैयात्येन भुजामदेन ललितारम्भेण मान्द्येन वा ।
वाक्-चेतस्तनुभिर्यदस्मि विनयभ्रंशास्पृहां लीढवान्,
आर्येण प्रियबान्धवेन विधुरे तन्मर्षणीयं मयि ॥ ८ ॥

([1]रामस्तारस्वरं प्रलपति ।)

बिभीषणः – देव ! समाश्वसिहि समाश्वसिहि ।

रामः – (सगद्गदम्)

भ्रातर्मां व्यसनाब्धिमग्नमधुना हातुं न ते युज्यते,
त्वद्दोर्दण्डबलेन राक्षसकुले ख्यातोऽस्म्यहं विक्रमी ।
द्राग् निद्रां तदिमां विमुञ्च यदहं न्यासीकृतस्तेऽम्बया,
बाष्पाव्यक्तगिरा वनाय चलतस्तद्वत्स ! किं विस्मृतम् ? ॥ ९ ॥

लक्ष्मणः – (सक्रोधम्)

आर्य ! ब्रूहि, क एष कातरदशाशंशी शुचां सङ्ग्रहो ?,
दैन्यं मास्म कृथा वृथा गिरि, हहा ! ज्येष्ठे कठोरं वचः ।
धिग् मां वैनयिकातिपातनिरतं, कस्कोऽत्र भोः !, सत्वरं
लीढाग्नीः समिधः समाहर, हरे येनाऽऽत्मनः कल्मषम् ॥ १० ॥

रामः – हा वत्स ! विनयमण्डन रघुनन्दन ! कामवस्थामधिगतोऽसि ? ।

लक्ष्मणः – बिभीषण ! ।

बिभीषणः – आदिशतु कुमारः ।

लक्ष्मणः – सुग्रीव ! ।

सुग्रीवः – एषोऽस्मि ।

---

१) रामः सास्रं प्र° उ० ।

लक्ष्मणः—आर्यस्य शरीरे प्रयत्नो विधेयः ।

विभीषणः—(विहस्य) कः प्रयत्नमाधास्यति ? ।

लक्ष्मणः—यूयम् ।

सुग्रीवः—एवमेतद्, यदि सर्वभर्ता भगवानाशुशुक्षणिः क्षुन्मान्द्यमनुभविष्यति ।

लक्ष्मणः—अस्तमेष्यति रघुकुलम् ।

विभीषणः—चिरं विजेष्यते रघुकुलं विहाय राम-लक्ष्मणौ विभीषण-सुग्रीवौ च ।

लक्ष्मणः—हनूमन् ! तातस्य पादौ दर्शय येन शिरसि निदधामि ।

रामः—(सभयम्) वत्स ! क एष चेतनाव्यामोहः ? । कुतो नामात्र तातपादाः ? ।

लक्ष्मणः—आर्य एव साम्प्रतं मे तातः ।

रामः—हा भ्रातृवत्सल बान्धव ! क्वासि ? देहि मे प्रतिवचनम् । (इति मूर्च्छति ।)

विभीषणः—देव ! समाश्वसिहि समाश्वसिहि ।

लक्ष्मणः—(अपवार्य) अमात्य ! व्यालुप्यते मे दृष्टिः । विमुञ्चति चेतना गात्राणि ।

जाम्बवान्—अस्तमितं तर्हि कपिकुलम् ।

लक्ष्मणः—

नाऽऽकीर्णा दशकन्धरी पलभुजां पत्युः शितैः पत्रिभि-
र्दत्ता नापि विभीषणाय सुहृदे लङ्काधिपत्यस्थितिः ।
वैदेही विरहाग्निमग्नमनसो नाऽऽर्यस्य सन्दर्शिता,
जातं जन्म वृथा हहा ! रणधुराधौरेयदोष्णो मम ॥ ११ ॥

रामः—(चेतनामास्थाय) अमात्य ! अस्मन्निमित्तं चितां कारय ।

जाम्बवान्—देव ! अभिनवसूर्योदयादर्वाग् न प्राणितमपहरति शक्तिरिति किलैतिह्यम्, ततः केयममङ्गलत्वरा ? । अपि नाम शक्तिनिःसारोपायः सम्पद्यते ।

(नेपथ्ये)

तिष्ठ, को भवान् ? ।

अहं प्रतिचन्द्रनामा विद्याधरो रामचन्द्रं द्रष्टुमभिलषामि ।

विद्याधरो वा निशाचरो वेति कः प्रत्येति ? । सत्वरमपसर व्यूहद्वारात् । अनवसर इदानीमन्यप्रवेशस्य ।

लक्ष्मणः—हनूमन् ! उत्थापय माम्, उपनय कार्मुकम्, येन निशाचरकोलाहलं निवारयामि ।

सुग्रीवः—युद्धवीर ! यथासुखमास्स्व । कपय एवामी परस्परं कलहायन्ते, न निशाचराः । (विमृश्य) दधिमुख ! जानीहि किंनिदानोऽयं कलकलः ? ।

(दधिमुखो निष्क्रान्तः ।)

रामः—अमात्य ! चितां प्रगुणय ।

विभीषणः—अमात्य ! वयमपि रामभद्रमार्गानुसारिणः ।

सुग्रीवः—वयमपि ।

हनूमान्—अहमपि ।

लक्ष्मणः—(पीडामभिनीय विभीषणं प्रति) प्राणप्रयाणसमय इव मे, तदितः स्थानादार्यमपसारय ।

रामः—वत्स लक्ष्मण ! ।

(लक्ष्मणः मोहं नाटयति ।)

रामः—(उच्चैःस्वरम्) तात सौमित्रे ! ।

विभीषणः—कुमार लक्ष्मण ! ।

सुग्रीवः—वीरावतंस ! देहि मे प्रतिवचनम् ।

(लक्ष्मणः निमीलितनेत्रस्तूष्णीमास्ते ।)

रामः—(सबाष्पम्)

तात ! त्रातः ! सुभट ! सुभग ! क्षीणयन्त्यौ त्रिलोकी-
मेकं वारं क्षिप मयि दृशावेष बद्धोऽञ्जलिस्ते ।
ज्येष्ठे बन्धौ प्रलपति पुरो दीनदीनैर्वचोभि-
र्भ्रातर्भ्रातः ! स्वपिषि समरे दीर्घया निद्रया किम् ? ॥ १२ ॥

सुग्रीवः—(अपवार्य) विभीषण ! किमेवं धैर्यमवजहाति देवः ? ।

विभीषणः—(साक्षेपम्)

दुःखयत्यस्तसम्बन्धान् बन्धुमृत्युर्मुनीनपि ।
प्रेमावनद्धमनसः किं पुनर्गृहमेधिनः ? ॥ १३ ॥

रामः—(तारस्वरम्)

योद्धारो रणरङ्गमल्लकपयः काङ्क्षन्ति ते विक्रमं,
शेषे तात ! किमद्य राक्षसचमूचक्रे युधं कामति ? ।
उत्तिष्ठ स्मर रक्षसो दशमुखीसंहारिणं पत्त्रिणं,
वैदेही यदियं हृता परिभवः सोऽयं न वत्सस्य किम् ? ॥ १४ ॥

विभीषणः - देव ! निद्रायते कुमारः । ततः क्षणं स्थानान्तरमलङ्क्रियताम् ।

रामः - (सवैकल्यम्) तर्हि यावन्निद्रायति कुमारस्तावदहं पितृभ्यो गत्वा समरसङ्कथां विज्ञापयामि । (पुनर्लक्ष्मणं प्रति)

वत्स ! त्वां समरे विहाय निहतं यातेन तां स्वां पुरीं,
मातुस्त्वन्मुखवीक्षणोत्सुकदृशः किं ब्रूहि वाच्यं मया ? ।
व्यक्तं मे वदनं न पश्यति पुरा बन्धुक्षयाधायिनः,
कौशल्याऽपि रघूद्वहः किमपरं सर्वोऽपि लज्जिष्यते ॥ १५ ॥

सुग्रीवः - अमात्य ! प्रगुणय चिताम् ।

(जाम्बवान् गवाक्षस्य कर्णे एवमेव ।)

(गवाक्षो निष्क्रान्तः ।)

रामः - (सदैन्यम्)

मातः क्षत्रियपक्षपातनिरते भूदेवते ! भ्रातरौ
सूर्या-चन्द्रमसौ ! सखे ग्रहगण ! व्यालम्ब्य लम्बां कृपाम् ।
लङ्कां दत्त विभीषणाय, दिशत क्षेमाणि सौमित्रये,
भिक्षां प्राणमयीं प्रयच्छ च शुचा क्षामाय रामाय च ॥ १६ ॥

(पुनः सवैकल्यं हनूमन्तं प्रति) कुमुद ! हनूमन्तं द्रष्टुमिच्छामि ।

हनूमान् - देव ! हनूमानहम् ।

सुग्रीवः - देव ! हनूमानयम् ।

रामः - हनूमन् ! गत्वा विज्ञपय तातमम्बां कौशल्यां मातरं सुमित्रां सवित्रीं कैकेयीं वत्सौ भरत-शत्रुघ्नौ च । यथा —— परलोकं प्रवसतो राम-लक्ष्मणयोरात्मपादान् दर्शयत ।

सुग्रीवः - (हनूमन्तं प्रति) कोऽयं चेतनाव्यामोहः ? । भवतु तावत् । क्षणं बहिः स्थित्वा समागच्छ ।

(हनूमान् निष्क्रान्तः ।)

(नेपथ्ये)

भो भोः ! त्वरन्तां त्वरन्तां कपयः !, समाग्चयत चितासहस्राणि, उपनयत चन्दना-ऽगरु-देवदारुप्राग्रहराणि दारूणि ।

रामः - (जाम्बवन्तं प्रति) तात ! (सुग्रीवं प्रति) वत्स भरत ! ।

---

१) रघूद्वहः ३० ।

जाम्बवान्—देव ! जाम्बवानहम्, न महाराजो दशरथः ।

सुग्रीवः—देव ! सुग्रीवोऽहम्, न कुमारो भरतः ।

(प्रविश्य)

दधिमुखः—देव कपिकेतो ! भामण्डलो रामभद्रपादान् द्रष्टुमभिलषति ।

सुग्रीवः—अमात्य ! प्रविशतु भामण्डलः । सम्यगुपलक्ष्य प्रवेश्यताम् ।

(दधिमुखो निष्क्रम्य सभामण्डलः प्रविशति ।)

सुग्रीवः—देव ! भामण्डलः प्रणमति ।

रामः—(सवैकल्यम्) हनूमन् ! अस्मज्ज्ञातयः समागताः ? ।

(प्रविश्य)

हनूमान्—देव ! एताः समायान्ति ।

बिभीषणः—देव ! सीतासहोदरो भामण्डलः प्रणमति ।

रामः—भामण्डल ! कुशलं तातजनकपादानाम् ? ।

भामण्डलः—प्रतिचन्द्रनामा विद्याधरः शल्यसमुद्धरणोपायमावेदयितुकामो देवपादान् द्रष्टुमभिलषति ।

सुग्रीवः—विद्याधरोऽसौ निशाचरो वेति कः प्रत्येति ? ।

भामण्डलः—सङ्गीतपुरराजस्य शशिमण्डलनाम्नो विद्याधराधिपतेस्तनयं तमह-मुपलक्षयामि ।

रामः—(सौत्सुक्यम्) सत्वरं प्रवेशय ।

(ततः प्रविशति गवय-गवाक्षविधृतः प्रतिचन्द्रः ।)

प्रतिचन्द्रः—(प्रणम्य) देव ! कौतुकमङ्गलनगराधिराजस्य कैकेयीबन्धोर्द्रोण-घनस्य विशल्या नाम कन्यका समस्ति ।

रामः—ततः किम् ?

प्रतिचन्द्रः—सूर्योदयादर्वागेव तस्याः स्नानपानीयेन कुमारो यद्यभिषिच्यते तदानीं तदात्व एवापगतशल्यो भवति ।

रामः—(सरोमाञ्चम्) भूयोऽप्येतदेव श्रावय ।

(प्रतिचन्द्रः तदेव व्याहरति ।)

रामः—(सदैन्यम्) भो भोः प्लवङ्गमवीरप्रकाण्डानि ! कोऽप्यस्ति वरूथिन्या-मस्यां सकलजङ्घालशिरोरत्नं विद्याधरः ? यः सहस्रकरोदयादर्वागेव तां विशल्यां समानीय लक्ष्मणप्राणप्रयाणप्रतिरोधेन रघूणां कुलमाश्वासयति ।

हनूमद्-अङ्गद-भामण्डलाः—(प्रणम्य) देव ! वयमिदमाधातुं प्रगल्भामहे ।

रामः—(सविनयम्) व्रजत तर्हि यूयम् ।

(हनूमदादयः प्रणम्य निष्क्रान्ताः ।)

(नेपथ्ये)

शक्तिप्रोतमवेक्ष्य लक्ष्मणमयं वक्षःकपाटोदरं,
देवः श्रीरघुसन्ततिप्रसविता प्रम्लानवक्त्राम्बुजः ।
शल्योद्धारविधायिनीं मृगयितुं स्फूर्जत्प्रभामौषधिं,
कामप्यञ्चति पश्चिमाचलवनक्षोणीं प्रभाणांपतिः ॥ १७ ॥

जाम्बवान्—देव ! शुभोदर्कं मागधः पठितवान् । तदिदानीं शुचमपहाय क्षणं सङ्ग्रामश्रमोऽतिवाह्यताम् ।

रामः—यदावेदयति मन्त्री तदस्तु ।

(निष्क्रान्ताः सर्वे ।)

॥ इति षष्ठोऽङ्कः ॥

[सप्तमोऽङ्कः]

(ततः प्रविशति रावणः सीता - त्रिजटे मालतिकाप्रभृतिकश्च परिवारः ।)

रावणः –

दुष्कीर्त्तिर्नयलङ्घिनां निरुपमः कोऽपि स्तनाडम्बरो,
लोकः शोकपरः पुरस्य कटरि ! स्फारा नितम्बस्थली ।
ज्ञातेयं जनता जहाति पुरतो वाचां सुधा सा मुधा,
धर्मध्वंसकृतामधोगतिरसून् धिग् मे विना जानकीम् ॥ १ ॥

(विमृश्य) त्रिजटे ! क्लेशकण्टकिलेऽपि जानकीसम्पर्कपर्वणि कथङ्कारमतितरामुत्कण्ठते दशकण्ठस्य चेतः ? ।

त्रिजटा – भट्टा ![1]

सयणं विसमं हियये समज्झसं संगमो विरलविरलो ।
अवरो च्चिय कोइ रसो तह वि हु पच्छन्नसुरयस्स ॥ २ ॥

रावणः – अपि नामेयं मालती सम्यगवबुध्य शक्तिनिःसारं विज्ञप्तवती ।

(प्रविश्य सम्भ्रान्तश्चन्द्रराशिः)

चन्द्रराशिः – देव ! विशल्याकरस्पर्शेन निःशल्यवक्षा लक्ष्मणः समजनि ।

रावणः – (साक्षेपम्)

स्थेयान् कल्पय सङ्ख्यामधिवपुः कोऽयं पृथुर्वेपथुः ?,
शक्तिर्लक्ष्मणवक्षसो निरगमन्नो रक्षसां वक्षसः ।
भूयासुर्जयिनश्चिरं सुरसमित्पौरोगवा बाहवो,
लङ्केन्द्रस्य पुनर्द्विषां दलयिता श्रीचन्द्रहासो मदम् ॥ ३ ॥

(नेपथ्ये)

कृत्या-ऽकृत्यविचारसारविदुरोऽप्यामुष्मिकानैहिकान्,
प्रत्यूहान् कलयन्नपि स्वचरितैर्भूम्ना विषीदन्नपि ।
किञ्चित् प्रेम तदाऽऽविरस्ति गहनं सा चेन्द्रियाणां स्थितिः,
काऽपि स्वैरचरी यतः श्लथयति न्यायस्य मुद्रां जनः ॥ ४ ॥

रावणः – कोऽयं विवेकमर्माणि भिन्दानो दशकन्धरस्य हेवाकमनुरुध्यते ? ।

---

१) भर्त्तः ! – शयनं विषमं हृदयं ससाध्वसं सङ्गमो विरलविरलः ।
अपर एव कोऽपि रसः तथापि खलु प्रच्छन्नसुरतस्य ॥ १ ॥

(प्रविश्य)

राक्षसः – देव ! आर्यो मयः समारीचो मन्दोदरी च देवी द्वारि वर्त्तते ।

रावणः – शीघ्रं प्रवेशय ।

(राक्षसो निष्क्रान्तः ।)

(ततः प्रविशति मयो मारीचो मन्दोदरी च ।)

मयः – वत्से !

उत्कण्ठवण्ठनटपेटकसूत्रधारः,
सीतास्वयङ्ग्रहमहग्रहिलः पतिस्ते ।
अस्मादृशां किमधुना मधुना समिद्ध-
कामेन्धनान्धलमतिः स गिरः शृणोति ? ॥ ५ ॥

तथापि तवानुरोधेन सन्धिनिमित्तं देवं विज्ञपयामि । (उपसृत्य रावणं प्रणमति ।)

रावणः – (ससम्भ्रमम्) किमर्थमार्यः स्वयमायातवान् ? ।

मयः – वत्सया समयोचितं किमपि विज्ञपयितुमानीतोऽस्मि ।

रावणः – यथेच्छं विज्ञपय ।

मयः – ([illegible])

न खलु तनुते देवः कीर्त्तेरनौपयिकीः क्रियाः,
स्वयमपि ततो वाच्यं किञ्चिचकास्ति न मादृशाम् ।
उचितमनिशं श्रोतुं भूम्ना नया-ऽनयदृश्वनां,
तदपि जरतां रक्षोवंशप्रियङ्करिणीर्गिरः ॥ ६ ॥

मारीचः –

विदन्तु सौहार्दमथाप्यसौहृदं,
महीभुजः स्वैरविहारचेतसः ।
अतामसीमर्हति शंसितुं पथैः,
परो रजोभिः सचिवः पुनः क्रियाम् ॥ ७ ॥

रावणः – (सप्रमोदम्)

यथारुचितमुच्यतां किमसुखाकरं वर्त्मनः ?,
प्रियाकरमुपासितुं प्रवयसां वयं कर्मठाः ।
हठादपि निषादिनो गजमिवोन्मदिष्णुं नृपं,
प्रतीपयितुमुत्पथादनिशमीशते मन्त्रिणः ॥ ८ ॥

मयः – देव! सीतापहारमतितरां जुगुप्सते लङ्कालोकः ।

रावणः – (साक्षेपम्) आर्य! सीतापहारमतितरां जुगुप्सते लङ्कालोकः ? ।

मयः – (सभयम्) अथ किम् ? ।

रावणः – (सावहेलम्)

अविदितपथः प्रेम्णां बाह्योऽनुरागरुजां जडो,
वदतु दयितामैत्रीवन्ध्यो यथाप्रतिभं जनः ।
मम पुनरियं सीता राज्यं सुखं विभवः प्रियं,
हृदयमसवो मित्रं मन्त्री रतिर्धृतिरुत्सवः ॥ ९ ॥

(पुनः सखेदम्) आर्य! किमेकमस्य पामरप्रकृतेर्लङ्कालोकस्य विचारचातुरीवैमुख्यमुद्भावयामि ? ।

अस्यां प्रेम ममेव वाङ्मनसयोरुत्तीर्णमन्यस्य चेद्,
वैदेह्यां नयनैकलेह्यलवणप्रारोहभूमौ भवेत् ।
कापेयं परिरभ्य स प्रकटयन्नुत्कुण्ठभूयं हठात्,
किञ्चित् कामिनमादधीत कृतवान् वेधास्तु मां रावणम् ॥ १० ॥

अपरथा पुनरार्य!

अर्हंयुनिकराग्रणीरघगणस्य धर्मार्गलां,
प्रसह्य यदि जानकीमभिरमेत लङ्कापतिः ।
अमुष्य ननु रोदसीविजयनिष्णदोष्णः समि-
न्मृगव्यरसिकस्तदा क इव नाम वैतण्डिकः ? ॥ ११ ॥

मयः – (अपवार्य) वत्से! यथावस्थितमभिधाने लङ्कापतौ किमपरं विज्ञपयामि ? ।

मन्दोदरी – (साश्रम) तात! किं मं पुच्छेसि ? । देवं पुच्छ ।

रावणः – आर्य! किमपरमुच्यते ?

अनुचितमिदं विन्ध्याल्लोक[illegible]यशो दिशो,
व्यथयतु नयभ्रंशादास्तां जगद् ग्रहिलेन्द्रियम् ।
बलपरिमलक्रीतीं स्वर्भूर्भुवस्त्रितयीं पुन-
र्बहुतृणमहं मन्ये सीतामुखेन्दुवियोजिताम् ॥ १२ ॥

मारीचः –

खण्डय न्यायतेजोभिः शूर! कौलीनदुर्दिनम् ।
अनीतिधूमरी हन्ति यशश्चूताग्रमञ्जरीम् ॥ १३ ॥

---

१) बन्धू रति° उ० । २) यजिष्णुदो उ० । ३) इह नाम उ० । ४) तात! किं मां पृच्छसि ? दैवं पृच्छ । ५) वियोजितः उ० । ६) °मञ्जरीः नाद० ।

मयः—

प्रंसृमरमविलम्बं भूर्भुवःस्वस्त्रयेऽस्मि-
न्नमरनगरनाथोन्माथवाणिज्यजन्म।
परयुवतिरिरंसाघोरहङ्गीरबन्धै-
र्विधुरयसि मुधैव स्वं यशो हा! किमेतत्?॥ १४॥

रावणः—(सरोषम्)

परयुवतिरसाविति प्रलापो,
नियतमयं तव विस्रसाप्रमादः।
उदवहमहमेव पूर्वमेतां,
ननु मनसा शबरः करेण पश्चात्॥ १५॥

सीता—(सरोषम्) हंदास! पडिहदो सि। (पुनर्मालतीं प्रति) सच्चकं च्चेव विसल्लाए लक्खणस्स सत्ती अवहरिदा?।

मालती—किमन्नहा भट्टिणीए विन्नवीयदि?।

रावणः—(विमृश्य चन्द्रं प्रति) समादिश शुकनासं कुन्दं च।

चन्द्रराशिः—किमादिशामि?।

(रावणः कर्णे एवमेव।)

(चन्द्रो निष्क्रान्तः।)

मयः—(सविनयम्)

परित्रातुं लोकत्रितयमखिलं कण्टककथा-
मनैषीदस्तं यः स भवति किमात्मम्भरिमनाः?।
अतः सीतामेतां त्यज जरठरागास्पदमपि,
प्रियेभ्यः प्राणेभ्यः स्पृहयतु समाजः पलभुजाम्॥ १६॥

रावणः—(विहस्य)

प्रपद्यन्तां तावत् तनुमपि च वेलां त्रिचतुराः,
कराः पुण्यां सीताकुचकलश-वक्त्राम्बुजदशाम्।
विगाढे निःशेषां त्रिजगदवतारे फलकथां,
विधातास्मः सर्वं तदनु कृतकृत्याः खलु वयम्॥ १७॥

(सीता सजुगुप्सं कर्णौ पिधत्ते।)

मयः—(सखेदमपवार्य) वत्से! असाध्योऽयमस्मादृशां भिषजां देवस्य वैदेहीपरिरम्भाभिलाषव्याधिः। तद् व्रजामो वयं यथास्थानम्।

---

१) प्रसृमरबलिबन्धो भू० उ०। २) हताश! प्रतिहतोऽसि। सत्यकमेव विशल्यया लक्ष्मणस्य शक्तिरपहृता?। ३) किमन्यथा भट्टिन्यै विज्ञप्यते?।

(मन्दोदरी मन्दं मन्दं रोदिति ।)

मारीचः—आर्य ! माम्म विषीद, पुनरपि प्रकारान्तरेण विज्ञपयामः ।

मयः—(सविनयम्)

अस्मत्प्रार्थनया, कलङ्कभयतः, सद्न्यायरक्षाकृते,
धर्मध्वंसविमर्शनात्, किमपरं ? शत्रोः प्रतापेक्षणात् ।
रक्षःसन्ततिराक्षसीं जनकजां मुञ्च, प्रसादं कुरु,
श्रान्तस्ते विहितोऽञ्जलिः, किमु नयस्येतां क्षयं बन्धुताम् ? ॥ १८ ॥

रावणः—(सरोष-सम्भ्रमम्)

अपात्रं शत्रूणां त्रिदशपुरवीरस्मयचय-
क्षयव्यक्तक्रीडासरभिकतरवारिर्दशशिराः ।
खलूक्त्वा वैदेहीत्यजनमषडक्षीणमपरं,
किमप्यार्यैः कार्यं दिशतु नयवाचालहृदयः ॥ १९ ॥

(पुनः सदर्पम्)

न मर्त्यो दैत्यो वा त्रिदश इति वा ज्ञातुमुचितो,
दशग्रीवस्तेजःप्रकृति परमं ब्रह्म किमपि ।
तदेतस्मै हेलातुलितगुरुशैलाय शबर-
प्रतापप्रागल्भीप्रथनमखिलं भस्मनि हुतम् ॥ २० ॥

(नेपथ्ये)

परोलक्षाः क्षुण्णा रजनिचरवीरैः कपिघटाः,
कनीयांसं शक्तिर्यमशरणमाधत्त शबरम् ।
निजामिच्छां म्लेच्छेऽप्रथयदथ वर्षीयसि शिखी,
प्रतापप्रागल्भी कटरि ! हरिजेतुर्विजयते ॥ २१ ॥

रावणः—(समाकर्ण्य सहर्ष-विषादम्)

सुधासारैः सिञ्चन् श्रुतिकुवलयान्याभ्युदयिकै-
रकस्मादस्माकं तिलकयति शौर्यं किमपि कः ? ।
हहा ! नीचैर्वृत्तिः सुरनगरलुण्टाकमहसो,
दशग्रीवस्यायं वनचरजयः कः परिपणः ? ॥ २२ ॥

(पुनर्विमृश्य सरोषम्) अरे ! कोऽयं दुरात्मा दशकन्धरप्रतापप्रशमिनीं शबरशक्तिर्गमकथां प्रथितवान् ? । (पुनर्विमृश्य) हुं ज्ञातम् । जलपाकचक्रवालचक्रवर्ती चन्द्रः ।

सीता—(सभयम्) हंजे मालति ! किं नेदम् ? ।

---

१) कपिभटाः इ० । २) सखि मालति ! किमिदम् ? ।

मालती – भट्टिणि ! मा उत्तम्म, जं य्येव मए विन्नत्तं तं य्येव पमाणं । एदं उण किं पि भट्टिणो कवडनाडयं ।

रावणः – कोऽत्र भोः ! ? ।

(प्रविश्य)

प्रहस्तः – आदिशतु देवः ।

रावणः – (साक्षेपम्) प्रहस्त ! दुरात्मानं चन्द्रं नियम्याऽस्मदन्तिकमुपनय ।

(प्रहस्तो निष्क्रान्तः ।)

(ततः प्रविशति नियन्त्रितभुजश्चन्द्रः ।)

सीता – (सबाष्पम्) रघुकुलदेवदाओ ! चंदसरीरयम्मि रक्खं करेध ।

रावणः – (स्वगतम्) सुसदृशीं चन्द्रभूमिकां शुकनाशो गृहीतवान् । (प्रकाशम्) अरे मुखर ! किंनिमित्तमलीकां शबरशक्तिनिर्गमकथां प्रथितवानसि ? ।

चन्द्रः – (सकम्पम्) देव ! वनेचरविपत्तिविधुरः कुमारो विभीषणस्तामिमां किंवदन्तीं मामुपचर्य कारितवान् ।

मयः – (मन्दोदरीं प्रति) वत्से ! पश्यन्त्यसि निजस्य प्रेयसः कपटनाटकम् ।

रावणः – (साक्षेपम्) अरे चन्द्र ! प्रतिहतोऽसि । वर्षीयसि जगदेकमल्ले दशकन्धरे बन्धौ कुतः कुमारो विधुरः ? ।

(प्रविश्य)

राक्षसः – भट्टा ! कुमारविभीसणपेसिदो सुकेऊ दारे चिट्ठदि ।

रावणः – शीघ्रं प्रवेशय ।

(राक्षसो निष्क्रान्तः ।)

(प्रविश्य सुकेतुः प्रणमति ।)

रावणः – सुकेतो ! कल्याणवान् वत्सो विभीषणः ? ।

सुकेतुः – देवस्य प्रतापेन । (पुनः सविनयम्) इदं विभीषणकुमारो लङ्कापतये विज्ञपयति—

सेवाश्राद्धसुपर्वकोटिमुकुटप्रग्रीववैहासिका,
ग्लानिं वैनयिकस्य कौणपपतेः पादाः सहन्तां मयि ।
येषां सङ्गरसंयतप्रियतमत्राणाय याच्ञानम-
त्पौलोमीतिलकोत्पतन्मृगमदो रक्षामषीलाञ्छनम् ॥ २३ ॥

---

१) भट्टिनि ! मा उत्ताम्य । यदेव मया विज्ञप्तं तदेव प्रमाणम् । एतत् पुनः किमपि भर्तुः कपटनाटकम् । २) रघुकुलदेवताः ! चन्द्रशरीरे रक्षां कुरुत । ३) भर्त्तः ! कुमारविभीषणप्रेषितः सुकेतुः द्वारे तिष्ठति ।

मयः – (सोरस्ताडमुच्चैःस्वरम्)

लङ्कां त्रिःसप्तकृत्वः प्रतिदिशमरयोऽरौत्सुरण्डीरदोष्णः,
काण्डीरान् कांदिशीकानकृषत विषयान् लुण्टयामासुराशु ।
गोष्ठे शूरत्वमेवं पुनरसिकुहनाताण्डवैर्नर्त्तयन्तः,
कष्टं कष्टं हताः स्मः समजनि रजनीचारिवंशो निरंशः ॥ २४ ॥

रावणः – (सखेदम्)

दर्पं संवृणु चन्द्रहास ! रभसः कोऽयं भ्रुवोर्भ्रूकुटौ ?,
हेवाकं विजहीत विश्वविजितौ नाद्यापि किं बाहवः ? ।
तां लङ्कामरुधन् पुलीन्द्र-कपयस्त्रिःसप्तकृत्वः पति-
र्वीरम्मन्यभुजोन्मदिष्णुहृदयो यस्याः स्वगं रावणः ॥ २५ ॥

(पुनः सोपशमम्) आर्य ! शान्तो भूत्वा नियोजय । किमावहामः ? ।

मयः –

मुच्यतां मैथिली सन्धिः सार्धमस्तु रघूद्वहा ।
भवतु स्वस्ति लङ्कायै ज्ञातयः सुखमासताम् ॥ २६ ॥

रावणः– (सरोषं विहस्य) आर्य !

मुच्यतां मैथिली सन्धिः सार्द्धं तेन रघूद्वहा ।
भवतु स्वस्ति लङ्कायै ज्ञातयः सुखमासताम् ॥ २७ ॥

मन्दोदरी – (सविनयम्) अज्जउत्त[1] ! जं तादो विण्णवेदि तं पडिवज्जसु ।

रावणः – देवि ! अनभिज्ञाऽसि महापुरुषव्रतस्य ।

इहाऽऽनीता सीता यदनुचितमेकं तदभवत्,
द्वितीयं यद् भर्त्तुर्न पुनरुपनीता वनजुषः ।
इदं तार्त्तीयीकं भवति पुररोधप्रतिभिया,
समर्प्यैतां सन्धिं घटयति यदीशः पलभुजाम् ॥ २८ ॥

अपि च देवि !,

खड्गबिम्बच्छलाद् यस्य स्वात्मैवाऽधिमृधं द्विषन् ।
निष्ठितारिः स संधत्ते रावणः किं वनेचरान् ? ॥ २९ ॥

मारीचः – (सरोषम्)

प्रत्यग्रयौवनभुजार्गलसाहसिक्य-
कन्थाभिराभिरलमद्य पटच्चरीभिः ।

---

१) आर्यपुत्र ! यत् तातो विज्ञपयति तत् प्रतिपद्यताम् ।

उद्धुद्धवार्द्धकभिदेलिमबाहुदण्ड-
खण्डोचितं किमपि वृत्तमुदाहरस्व ॥ ३० ॥

मन्दोदरी – (रावणस्य पादौ शिरसि निधाय सदैन्यम्) **अज्जउत्त ! जं तादो विन्नवेदि तं पडिवज्जसु ।**[1]

[**रावणः** –] देवि ! मुञ्च मुञ्च, प्रतिपन्नस्ते कदाग्रहः । (पुनः सोपशमम्) **कस्कोऽत्र ?**

(प्रविश्य)

कुन्दः – आदिशतु देवः ।

रावणः –

व्रज कुन्द ! सन्धिघटनाहेतोः
(पुनः सरोषं चन्द्रहासं परामृश्य)
अरे ! मां शठः,
शौर्यात् कोऽश्लथयत् ?
(मयादयः सर्वे सभयं तिरोदधते ।)

रावणः – (पार्श्वतोऽवलोक्य)
कथं न सविधे कोऽप्यस्त्यहं केवलः ?।
(सवितर्कम्)
कोऽहं ?
(विनिश्चित्य)
हुं ननु रावणः
(सविमर्शम्)
किमिदम् ?
(विनिश्चित्य)
आः ! सन्धापरैः
(सगर्वम्)
रावणः
सन्धत्ते द्विषतः
(सनिर्वेदम्)
प्रतीच्छति न किं काङ्क्षन् प्रियां जानकीम् ? ॥ ३१ ॥

(पुनः कुन्दं प्रति) **यावदुपलिङ्गान्तरं किमपि नोपतिष्ठते तावदस्मदाज्ञया वनेचरमिदं समादिश ।**

---

१) आर्यपुत्र ! यत् तातो विज्ञपयति तत् प्रतिपद्यस्व ।

कुन्दः – देव! किमादिशामि ? ।

(प्रविश्य)

प्रतिहारी – [1]भट्टा ! काराहरपालगो दारे चिट्ठदि ।

रावणः – (साशङ्कम्) शीघ्रं प्रवेशय ।

(प्रतीहारी निष्क्रान्ता ।)

कुन्दः – देव ! सन्धिनिमित्तं वनेचरं किमादिशामि ? ।

(प्रविश्य सम्भ्रान्तः)

क्रूरः – देव ! प्रतिपक्षभयाकुलमवेक्ष्य राजकुलं शक्रपदातयः स्वं वन्दिलोकमपहृत्य गताः ।

रावणः – (साक्षेपम्)

दशास्ये दास्याय स्पृहयति विदेहेन्द्रदुहितुः,
स शक्रः स्वं लोकं हरति हरतां किं न रुचिरम् ? ।
कृतार्थे त्वेतस्मिन्नमरनगरी किञ्चिदपि यद्,
विगाहेन स्वास्थ्यं नदथ यदि चक्रं कलयति ॥ ३२ ॥

मयः – (सविषादम्) वत्स ! किमिदं शान्ति कुर्वतां वेतालोत्थानम् ? । (मन्दं मन्दं रोदिति ।)

सीता – (सखेदम्) [2]तिर्यंडे ! पेच्छ कधं संधाणस्स पच्चूहो जादो ? ।

रावणः – (मयं प्रति साक्षेपम्) आर्य ! पश्चादपि सन्धानमाधास्यामः ।

तं तूर्णमानुपदिकं त्रिदिवाङ्गनानां,
श्रीकुम्भकर्णसुत शक्रजितं विधेहि ।
येन क्षपाचरपतेः पुरुहूतकान्ता-
हिञ्जीरहेषितसुधां श्रुतयः पिबन्ति ॥ ३३ ॥

(पुनः क्रूरं प्रति सदर्पम्) मा स्म विषादनिषादं स्पृशः ।

सुरसमरसरस्वत्कर्णधारे कुमारे,
हरिजिति यदि वा श्रीकुम्भकर्णेऽभ्यमित्रे ।
पुनरमरवधूटी घोरहिञ्जीरहेषा-
कवचनिचुलिताङ्गी गुप्तिरन्ध्रम्भविष्णुः ॥ ३४ ॥

मन्दोदरी – (सोरस्ताडम्) [3]हा महावीर कुंभयन्न ! हा पुत्त इंदइ ! कहं माए पुणो मंदभायाए दिट्ठव्वो सि ? । (इति प्रलपति ।)

---

१) भर्तः ! कारागृहपालको द्वारे तिष्ठति । २) त्रिजटे ! पश्य कथं सन्धानस्य प्रत्यूहो जातः ? । ३) हा महावीर कुम्भकर्ण ! हा पुत्र इन्द्रजित् ! कथं मया पुनः मन्दभागया द्रष्टव्योऽस्मि ? ।

रावणः – देवि ! किमिदमश्रुतचरं नः श्रावयसि ? ।

मयः – (सबाष्पम्) देव ! ह्यस्तने समरसंरम्भे कुमारः शक्रजित् कुम्भकर्णश्च वनेचर - कपिभिर्नियम्य (इत्यर्द्धोक्तावधोमुखीभवति ।)

रावणः –

हुं शक्रः स जितो जितो धृतधृतः कैलाशशैलोऽम्बरे,
क्रान्तं क्रान्तमिदं जगत् प्रतिभटप्रावासिकैर्बाहुभिः ।
[1]येयं सम्प्रति बन्धुबन्धनकथा लङ्कापतेर्जीवतः,
कर्णेषु प्रथते किमेकमनयाऽगीतं न विस्फूर्जितम् ? ॥ ३५ ॥

(पुनः साक्षेपम्)

यात्रां संवृणु देवि ! दुर्दमधुराधुर्यस्य लङ्कापते-
र्वीरस्यासि सधर्मिणी करुणया किं बान्धवद्वेषिणी ? ।
ज्वालामांसलचन्द्रहासकुलिशव्यालीढकण्ठस्थला-
दुत्कृत्तस्य वनान्तचारिशिरसः सन्धिं विधातास्महे ॥ ३६ ॥

(पुनरूर्द्धमवलोक्य साशङ्कम्)

केयाकेशि किमम्बरे दिविषदां स्थानार्थिनां ? मागधैः,
प्रेर्यन्ते किमभिक्रमार्थमधिकं रक्षश्चमूचारिणः ? ।
आश्वीयस्य च हास्तिकस्य च रजः काष्ठाः स्तृणीते कथं ?,
कस्मात् कावचिकान्यहम्प्रथमिकां साङ्ग्रामिकीं बिभ्रति ? ॥ ३७ ॥

(पुनः साक्षेपम्) आर्य ! किमिदम् ? ।

मयः – देव ! शबरवर्गीयाणामवस्कन्द इव लक्ष्यते ।

(नेपथ्ये)

बन्दी –

वीरास्त्रस्यत रे ! रणं सुरवधूनेत्रप्रियम्भावुकः,
स्कन्धाभोगभयङ्करो रघुपतिः सोऽयं स्वयं क्रामति ।
यद्बाणाशनिदक्षिणेर्मधमनीनिश्च्युतरक्तारुणं,
भूयोऽपि ग्लपयाञ्चकार मरुतस्तत्कौम्भकर्णं वपुः ॥ ३८ ॥

सीता – (सहर्षम्) [2]तियडे अज्जउत्तवन्नणासवणेण चिरा निव्वाविद म्हि ।

रावणः – (सक्रोधम्)

चक्रं चक्रमरे !

---

१) येयं बन्धु-तनूजबन्धन उ० । याऽऽरम्भं प्रति बन्धुबन्धन नाद्. । २) त्रिजटे ! आर्यपुत्र वर्णनाश्रवणेन चिराद् निर्वापिताऽस्मि ।

(पुनः सखेदम्)

मनुष्यनिहतो धिग! मां समुत्कन्धरं,

(सविमर्श-रोषम्)

वैदेहीं स्पृहयालुरेष हतको, केयं तदस्मिन् कृपा? ।

(सवितर्कभयम्)

एतस्मिन्नुपसंहृते किमपि सा कापेयमाधास्यते,

(विनिश्चित्य)

सीताजीवितजीवितस्य तदयं मृत्युर्ममोपस्थितः ॥ ३० ॥

मयः – (अपवार्य) **प्रतिहतममङ्गलम् । विजयते घनवाहनकुलम् ।**

मन्दोदरी – [१]रक्खसकुलदेवदाओ! इमं अमंगलं पडिहणंतु ।

रावणः – (साक्षेपम्) **सुकेतो! गजपतिसहस्रवाह्यं जैत्रं पताकिनं प्रगुणीकारय । चन्द्रहास! स्वं नियोगमनुतिष्ठ । आर्य! त्वमपि सैनिकान् सावधानीकुरु ।** (सीतां प्रति सविनयम्) स्वयं वयं शबरस्य शिरः संहर्तुमुपक्रंस्यामहे ।

(इति निष्क्रान्ताः सर्वे ।)

॥ सप्तमोऽङ्कः ॥

---

१) राक्षसकुलदेवताः! इदं अमङ्गलं प्रतिघ्नन्तु

[अष्टमोऽङ्कः]

(ततः प्रविशति सारणः ।)

सारणः – (सविषादम्)

ये सदा सरुजो ये च भृत्या भृत्यद्विषि प्रभौ ।
जीवितं मरणं तेषां मरणं जीवितं पुनः ॥ १ ॥

(नेपथ्ये)

परमत्थं मंतेसि —[1]

अंधाण दरिद्दाण य परव्वसाणं च वाहियाणं च ।
जं चिरकालं जीअं तं खलु पावस्स माहप्पं ॥ २ ॥

सारणः – कथमियं दारुणिका ममाभिप्रायमनुरुध्यते ? ।

(प्रविश्य)

दारुणिका – अज्ज सारण ! कत्थ पत्थिदोऽसि ?[2] ।

सारणः – मातामहस्य माल्यवतः समीपे देवेन प्रेषितोऽस्मि ।

दारुणिका – किं ति ?[3] ।

सारणः – (सखेदम्) कियन्ति रावणस्य कपटनाटकानि तुभ्यमावेदयामि ? । (पुनः कर्णे एवमेव)

दारुणिका – (सखेदम्) अज्ज अदिदारुणं खु एदं । अवि णाम एदं अदिट्ठपुव्वं पेच्छिय सीदा विवज्जदि ।[4]

सारणः – विज्ञपितमिदं मया देवाय । ततो मां व्यापादयितुं देवश्चन्द्रहासमाकृष्टवान् । तदलमनया रावणचरितमीमांसया । कथय क्व प्रस्थिताऽसि ?

(दारुणिका कर्णे एवमेव ।)

सारणः – व्रज तर्हि राम-रावणालङ्कृतं सङ्ग्रामम् । अहमपि यथादिष्टमादधामि

(इति निष्क्रान्तः ।)

॥ विष्कम्भकः ॥

---

१) परमार्थं मन्त्रयसि ।
अन्धानां दरिद्राणां च परवशानां च व्याधितानां च ।
यत् चिरकालं जीवितं तत् खलु पापस्य माहात्म्यम् ॥ २ ॥

२) आर्य सारण ! कुत्र प्रस्थितोऽसि ? । ३) किमिति ? ।

४) आर्य ! अतिदारुणं खलु एतत् । अपि नाम एतद् अदृष्टपूर्वं प्रेक्ष्य सीता विपद्यते ।

(ततः प्रविशति रथेन रावणः प्रहस्तप्रभृतिकश्च परिवारः ।)

रावणः—(समन्तादवलोक्य)

प्राचीनमञ्चति वियत् पृथुशोककोक-
कान्ताकपोलपुलकौपयिकं दिनेशः ।
श्रान्ता इवास्ततटकुट्टिममाश्रयन्ति,
राजीवजीवितहृतो हरिणाङ्कपादाः ॥ ३ ॥

प्रहस्तः—देव ! किमप्यद्भुतं वर्तते ? । तथाहि मनुजमात्रविजयेऽपि निर्जित[1]-वास्तोष्पतेर्लङ्कापतेः—

तुच्छं रुष्टमुदास्रि सत्वरमर्वागुत्तानमार्त्तं दृढं,
मुग्धं रौद्रमतन्द्रि खेदि विशदं ताम्रं विशालं कृशम् ।
स्फारव्रीडमहंयुतापरवशं हिंस्रं कृपापक्ष्मलं,
चक्षुर्विंशतिसङ्ख्यमेतदभवच्चित्रं विरुद्धस्थितिः ॥ ४ ॥

रावणः—(सविषादा-ऽवष्टम्भम्)

विजेतुर्जम्भारिं मनुजपृथुकस्यापि विजये,
दृशो मानाभावान् दधति यदरिष्टं किमपि तत् ।
अरिष्टानि स्युर्वा कति न सुकृतानां प्रतिभुवं,
परीपाकप्राप्ये जनकपतिपुत्रीपरिचये ? ॥ ५ ॥

(पुनर्विमृश्य) **कोऽत्र भोः !? ।**

(प्रविश्य)

राक्षसः—एषोऽस्मि ।

रावणः—अरे सर्पकर्ण ! समादिश कुन्दम्, यथा—दारुणिकासमादिष्टे वस्तुनि सावधानेन भवितव्यम् ।

(राक्षसो निष्क्रान्तः ।)

रावणः—कियति दूरे तौ वनेचरौ ? ।

प्रहस्तः—देव ! नेदीयांसावेव तावेतौ रथिनौ ।

(ततः प्रविशति रामो लक्ष्मणश्च ।)

रामः—वत्स ! यदिदानीं वामं दक्षिणं च चक्षुः स्फुरति तदशुभपूर्वं शुभमुदर्कं तर्कयामि ।

---

१) तर्जितवास्तो° उ० ।

लक्ष्मणः–पारदारिके पापीयसि राक्षसे कोऽयमार्यस्य समरसंरम्भः ? । तदहमेव दुरात्मानमेनमुपसंहरिष्ये ।

रावणः–(सावहेलम्)

अरे म्लेच्छौ ! को वां जनकतनयाजानिरनिशं,
विजिज्ञासुः सोऽहं द्रुतमथ भवन्तौ विवृणुताम् ।
दशास्यान् त्रस्यन्ती यमधिमनसं ध्यायति मुदा,
सदा सा वैदेही स हि कृतधियां द्रष्टुमुचितः ॥ ६ ॥

लक्ष्मणः–(साधिक्षेपम्) अरे पारदारिक !

नृपतिविनतिशिक्षासन्नदीक्षापवित्र-
स्त्रिजगदभयदुर्गं जानकीजानिरेषः ।
अनधिगतचराणां कौतुकी बन्धनानां,
यमधिरणमपश्यत् कुम्भकर्णोऽपि वीरः ॥ ७ ॥

रावणः–(अनाकर्णितकेन रामं प्रति) अरे वनेचर ! विरम विरम समरसंरम्भात्, न खलु पात्रं लङ्कापतिर्मर्त्यविक्रमाणाम् ।

आसन्नैकान्नविंशैः क्षितिभृति गगनान्तर्धृते येन दोर्भिः,
सौधप्रग्रीवमालाकरणिमुपनवान्याननान्याश्रयन्ते ।
तस्मिंस्त्रैलोक्यवीरस्मयविजयमयीमभ्यमित्र्यप्रशस्तिं,[1]
बिभ्राणे स्वर्गराजोऽप्यजनि बहुरजः किं पुनर्मर्त्यडिम्भः ? ॥ ८ ॥

लक्ष्मणः–(सोपहासम्)

विगाढान्तःसारः स जगति कुबेरक्षितिधरः,
पिशाचः सावज्ञं क्षिपति यमभिव्योम भुजया ।
पिशाचोऽपि ज्ञातः स च विकचवीरव्रतचण-
स्तदुत्क्षेपेणापि स्पृशति हृदि दर्पं किमपि यः ॥ ९ ॥

रावणः–अरे कूपकच्छप ! अनभिज्ञोऽसि दाशकन्धरीणां वीरचर्याणाम् ।

अनिमिषभूयमनिन्दन् मघवा यदसिस्फुलिङ्गनिचिताक्षः ।
एकधुरस्तस्य पुरः समराङ्गणरिङ्गणः कः स्यात् ? ॥ १० ॥

रामः–(सावहेलम्)

जीर्यन्मर्कटखेटलुण्टितभुजव्यूहावलेपेन यः,
क्रव्यादेन नियम्य चारककुटीक्रोडाकुटुम्बीकृतः ।

१) °मित्रप्रशस्तिं उ० ।

सुत्रामा हतकः स नाकखल्पूस्तत्क्षेपगर्भैरथो,
काकुस्थेषु किमेषु रोहति चमत्काराङ्कुरः स्फूर्जितैः? ॥ ११ ॥

रावणः—(चन्द्रहासं परामृश्य) अरे! अलीकभुजाशौण्डीर्यदर्पेण वृथाऽस्मानमुपसंहरसि।

न शक्तिः सौमित्रिं यदकृत कृतान्तप्रणयितां,
नियन्त्री तत्राभूज्जनकपतिपुत्रीविधुरता।
कृपाणः क्षुन्दानः पुनरयमरातीनपघृणः,
शृणिर्निस्त्रिंशानां जगति भवितुं कः परिवृढः? ॥ १२ ॥

रामः—(सकरुणमिव) अरे पारदारिक! वीरसारमेय!

चापाचार्यकमेष लक्ष्मणभुजः सन्तन्य नाडिन्धमै-
र्यावन्नास्थिघनाः कषत्युपनवाः कण्ठस्थलीः सायकैः।
तावन्मुञ्च पिशाचिकां रणरसोदन्यां वराकी सुत-
व्यापत्तिव्यसनानभिज्ञनयना सन्तिष्ठतां कैकसी ॥ १३ ॥

रावणः—(सरोषम्) अरे म्लेच्छाधम! दशकन्धरस्य मातरमधिक्षिपसि?। गृहाण शस्त्रम्। इदानीमेष न भवसि।

(नेपथ्ये)

विरम विरम बन्धो! साहसिक्यादमुष्माद्,
विमृश रघुषु कस्ते शस्त्रहेवाकपाकः?।
अमरनगरलक्ष्मीलुण्टनाह्यम्भविष्णुः,
क्षितिवलयविहारी हार्यते किं प्रतापः? ॥ १४ ॥

रावणः—(विलोक्य) कथमयं बान्धवाधमो दुरात्मा बिभीषणो मां दशकन्धरमनुशास्ति?। (पुनरुच्चैःस्वरम्)

आः पाप! ज्ञातिहत्यानिचुलितवदन! भ्रातृबन्धोः स्ववंश-
प्रभ्रंशस्थूललक्षश्रुतिषु मम गिरः पांशुराः किं तनोषि?।
रे रे सोदर्य! लज्जाज्वरविधुरभुजो रावणस्त्वां तितिक्षु-
र्ज्वालाजिह्वालधारस्त्वयि पुनरनये चन्द्रहासो नृशंसः ॥ १५ ॥

लक्ष्मणः—अरे राक्षसापसद! हितानुबन्धिनि बन्धौ कोऽयं शस्त्रसङ्ग्रहाग्रहः?। गृहाणास्त्रम्। रणकण्डूभृतां तव दोष्णामेषोऽहमगदङ्कारः।

रावणः—अरे म्लेच्छ! प्रगुणय चापचापलम्। सततसन्निहितचन्द्रहास एवैष लङ्कापतिः।

(आकाशे)

अलं संरम्भेण त्यजत समराडम्बररुजं,
यदर्थं क्लेशोऽयं तदभवदपन्थाः खलु दृशाम् ।

रामः – (ससम्भ्रमम्) वत्स लक्ष्मण ! किमिदम् ? ।

लक्ष्मणः – दैवी वागियम् ।

रामः – किमर्थमस्माकं क्लेशः ? ।

लक्ष्मणः – सीतार्थम् ।

रामः – तत् किं सीता दृशामपन्थाः ? ।

लक्ष्मणः – स्फुटं नावगच्छामि ।

रावणः – प्रहस्त ! किमिदम् ? ।

प्रहस्तः – दैवी वागियम् ।

रावणः – किमर्थमस्माकं क्लेशः ? ।

प्रहस्तः – सीतार्थम् ।

रावणः – तत् किं दृशामपन्थाः ? ।

प्रहस्तः – स्फुटं नावगच्छामि ।

(पुनराकाशे)

स एवैकः श्लाघ्यो रघुपतिरसौ यस्य विरहे,
हहा हा ! वैदेही तृणमिव जहौ जीवितमपि ॥ १६ ॥

रामः – हा प्रिये वैदेहि ! क्वासि ? देहि मे प्रतिवचनम् (इति मूर्च्छति ।)

रावणः – हा प्रिये वैदेहि ! क्वासि ? देहि मे प्रतिवचनम् । (इति मूर्च्छति ।)

लक्ष्मणः – (सपूत्कारम्) सुग्रीव सुग्रीव ! हनूमन् हनूमन् ! त्वरस्व त्वरस्व, उपनयस्व उपनयस्व चन्दन-व्यजनादीनि ।

(प्रविश्य सुग्रीव-हनूमन्तौ चन्दनाद्यै राममाश्वासयतः ।)

प्रहस्तः – (उच्चैःस्वरम्) भो भोः पलभुजः ! त्वरध्वं त्वरध्वम्, उपनयध्वं उपनयध्वं चन्दन-व्यजनादीनि ।

(प्रविश्य शुकनाशः चन्दनाद्यै रावणमाश्वासयति ।)

रामः – (चेतनामास्थाय सुग्रीवं प्रति) अलमतः परं समरसंरम्भेण । उपनयत मां शिबिरसन्निवेशं येन जानकीप्रेमानुरूपमाचरामि ।

सुग्रीवः – देव ! कोऽयमनिर्णीतपरमार्थे वस्तुनि शिवेतरोपक्रमः ? ।

रावणः – (चेतनामास्थाय) शुकनास ! समादिश त्रिजटाम् ।

शुकनाशः—देव ! किमादिशामि ? ।

(प्रविश्य सम्भ्रान्ता)

त्रिजटा—भट्टा ! मुसिद म्हि मुसिद म्हि । दाणि गयणमग्गे हविय हदासेहिं सुरवइणो पाइक्केहिं 'रावणेण रामो वावादिदो' त्ति पवादो कदो, तदो तं सुणिय सीदा पाणेहिं परिचत्ता ।

रावणः—(साक्षेपम्) आः ! शक्रस्य पदातिभिः किमिदमनुष्ठितम् ? ।

(त्रिजटा उच्चैःस्वरं प्रलपति ।)

(रामः चापमपहाय मूर्च्छामभिनयति ।)

(नेपथ्ये)

अलमलं विषादेन किमपि कूटनाटकमिदम् । न नाम पाकशासनः साहसमिदमनुतिष्ठति ।

सुग्रीवः—देव ! उपपन्नमाह बिभीषणः ।

रावणः—(सरोषम्) अमुना पदातिदुर्विलसितेन भूयोऽपि शुनासीरः शिक्षामर्हति । यदि वा शबरस्यास्य विरहे वैदेही जीवितं जहौ तदयमेव प्रथमं संहारमर्हति ।

(रामं प्रति सगर्वम्)

अनायुधकरं परं सुरपुरन्ध्रिहास्यद्रुहो,
निहन्तुमधिसङ्गरं न खलु शिक्षिता बाहवः ।
धनुः स्मर धनुः स्मर द्रुतमतः परं प्राणित-
प्रथां न तव मृष्यते शबरडिम्भ रे ! रावणः ॥ १७ ॥

रामः—(साक्षेपम्)

रे रे क्रव्यादखेट ! प्रतिसुभटघटागर्वसर्वङ्कषाणां,
काकुस्थानां समीके प्रहरणविरहं बाहवः किं श्रयन्ते ? ।
एते सन्त्येव देवद्विरदमदमुषः कुम्भकर्णस्य मैत्र्या,
लब्धास्वादाः पलादासृजि तव रुधिरं पातुमुत्काः पृषत्काः ॥१८॥

रावणः—(अपवार्य प्रहस्तं प्रति) कथं वैदेहीविपत्तिश्रवणेऽपि तावानेवास्य शबरस्य सम्प्रहारहेवाकः ? ।

प्रहस्तः—देव ! शोकशङ्कुभिरभेद्यं क्षात्रं तेजः कूटकोटिभिरपि न वैधुर्यमधिगच्छति ।

---

१) भर्त्तः ! मुषिताऽस्मि मुषिताऽस्मि । इदानीं गगनमार्गे भूत्वा हताशैः सुरपतेः पादात्यैः 'रावणेन रामो व्यापादितः' इति प्रवादः कृतः, ततः तं श्रुत्वा सीता प्राणैः परित्यक्ता ।

रावणः–त्रिजटे! व्रज त्वम्। यावद् वयं शबरं व्यापाद्य समागच्छामस्तावद् विदेहदुहितुरनलसंस्कारो रक्षणीयः। वयमपि तया सह चितामारोक्ष्यामः।

(त्रिजटा निष्क्रान्ता।)

रामः–हनूमन्! सीताविपत्तिपरमार्थं कथमपि विज्ञाय त्वरिततरं विज्ञपय।

(हनूमान् निष्क्रान्तः।)

प्रहस्तः–शुकनाश! आर्यमाल्यवन्तं विज्ञपय, यथा सारणोपदिष्टं कर्म त्वरिततरमनुष्ठेयम्।

(शुकनाशः परिक्रामति।)

रावणः–(चन्द्रहासमादाय)

रुन्धानो व्योमरन्ध्रं स्फुरदनलकणैर्दक्षिणेर्माणि मर्मा-
ण्यातन्वानस्त्रिलोकीवलयभुजभृतां दुर्निवारैः प्रहारैः।
पायं पायं वनान्तश्चररुधिरजलान्यस्तु धाराकरालः,
कल्पान्तभ्रान्तकालभ्रुकुटिसहचरश्चन्द्रहासो ममासिः॥ १९॥

(रामं प्रति) अरे! एहि विमर्दक्षमां क्षमामवतरामः। (इति तथाकुर्वन्ति)

शुकनाशः–कथमयमार्यो माल्यवान् सारणश्च?।

(ततः प्रविशति माल्यवान् सारणश्च।)

माल्यवान्–वत्स!

विरिञ्चिः संसोढा न च चिरमपारस्य महसो,
न च म्लानेः पात्रं समरभुवि लङ्कापरिवृढः।
तदेतन्निःशङ्कं द्वयमपि न विद्मः पुनरिदं,
विरिञ्चिः साधीयान् किमयमुत लङ्कापरिवृढः?॥ २०॥

तदवगच्छ–वचनकलहादायुधकलहमधिरूढो न वा लङ्कापतिः?।

शुकनासः–आयुधकलहमधिरूढ एव देवः। अनुष्ठीयतां सारणोपदिष्टो देवादेशः।

माल्यवान्–(सत्वरम्) सारण! गच्छ तर्हि चक्रपादं सर्पकर्णं च ब्रूहि, यथा–समयोऽयं भवताम्।

(सारणो निष्क्रान्तः।)

शुकनासः–आर्य! आयुधखुरलीदुर्ललितयो राम-रावणयोः कस्य विजयं वितर्कयसि?।

माल्यवान्–

यः स्त्रीमात्रकृते तृणं गणयति स्वर्भूर्भुवो वैभवं,
सन्तः पामरमुद्गृणन्तु तमुत प्रारब्धनिर्वाहिणम् ।
जानीमः पुनरेतदेव हि वयं युद्धाध्वरश्रोत्रियो,
नाऽऽसीन्नास्ति न वा भविष्यति दशग्रीवात् प्रवीरोऽपरः ॥ २१ ॥

(प्रविश्य सम्भ्रान्तः)

राक्षसः–आर्य ! राममन्तरयित्वा त्रिभुवनभयङ्करं किमपि लक्ष्मणेनोपक्रान्तं यत्सत्यं लङ्कापतिरपि चक्रावशेषायुधः कृतः ।

माल्यवान्–(सखेदम्)

न वीरः पौलस्त्यात् पर इति कृपाणव्रणमयी,
प्रशस्तिः पौलोमीपतितनुनिषण्णा विवृणुते ।
असावप्याप्नोति व्यसनमधियुद्धं यदि तदा,
श्रियो यातायातप्रकृतिरचिकित्स्या विजयते ॥ २२ ॥

तदेहि शुकनाश ! जानकीसविधमुपसर्पामः ।

(ततः प्रविशति सीता त्रिजटा च ।)

सीता–(सभयम्) तियडे ! [1] जधा पुणो पुणो दाहिणं वामं च नयणं परिप्फुरदि तधा दुक्खं सुहं च किं पि संभावेमि ।

त्रिजटा–भट्टिणि ! [2] मह दाव दाहिणं य्येव नयणं परिप्फुरदि तदो दुक्खं य्येव किं पि संभावेमि । ता भट्टिणो किं पि अमंगलं सुणिय जइ पढमं अहं य्येव विवज्जेमि ता समुचितं भोदि । हला मालदीए ! पगुणीकरेहि चिदं ।

(प्रविश्य मालती तथाकरोति)

माल्यवान्–शुकनाश ! सहकारतिरोहिता भवाऽऽस्महे ।

(नेपथ्ये)

भो भोः ! प्रवर्त्यन्तां प्रवर्त्यन्तां मङ्गलानि । विजयते वीरमतल्लिकादेवो लङ्कापतिः ।

माल्यवान्–साधु रे समयज्ञ चक्रपाद ! साधु ।

सीता–तियडे ! [3] अमंगलं विय अज्जउत्तस्स संभावीयदि । हा अज्जउत्त ! ।

---

१) त्रिजटे ! यथा पुनः पुनः दक्षिणं वामं च नयनं परिस्फुरति तथा दुःखं सुखं च किमपि सम्भावयामि ।
२) भट्टिनि ! मम तावद् दक्षिणमेव नयनं परिस्फुरति ततः दुःखमेव किमपि सम्भावयामि । तद् भर्तुः किमपि अमङ्गलं श्रुत्वा यदि प्रथमं अहमेव विपद्ये तत् समुचितं भवति । हला मालतिके ! प्रगुणीकुरु चिताम् ।
३) त्रिजटे ! अमङ्गलं इव आर्यपुत्रस्य सम्भाव्यते । हा आर्यपुत्र ! ।

(नेपथ्ये)

वत्से जानकि ! परित्रायस्व परित्रायस्व ।

सीता – तिअडे[1] ! एस तादो जणओ पलवदि । हा दिव्व ! किं नेदं उवत्थिदं ? ।

(ततः प्रविशति क्रव्यादैर्नियन्त्रितभुजो जनकः ।)

सीता – (विलोक्य सकरुणम्) ताद ! किं नेदं ? ।

जनकः – (सकरुणम्) वत्से ! किं कथयामि मन्दभाग्यः ? । दुरात्मना रावणेन व्यापादितो रामभद्रः । अहं च वधार्थमादिष्टोऽस्मि ।

(सीता सहसा मूर्च्छति ।)

(त्रिजटा समाश्वासयति ।)

सीता – (चेतनामास्थाय) हा[2] अज्जउत्त ! हा तिहुयणेक्कमल्ल ! हा सुहय ! कहिं सि ? देहि मे पडिवयणं । (इति प्रलपति । पुनरुत्थाय) तिअडे ! अहं हुआसणमणुसरिस्सं ।

(प्रविश्य क्रुद्धः)

राक्षसः – (क्रव्यादान् प्रति) अरे दुरात्मानः ! किमर्थं सीतासविधमानीतः ? द्रुततरमेतं पितृवनमुपनयत । (इति सरोषं जनकमाकर्षति ।)

जनकः – (सदैन्यम्) वत्से ! अनुकूलय कथमपि दशकन्धरम् । देहि मे प्राणभिक्षाम् ।

सीता – ताद[3] ! कीस गत्तराणं पाणाणं कदे अणुचिदे कम्मणि निओएसि ? । पइदेवदाओ कुलपुत्तियाओ हवंति । ता अहं हुयासणमणुसरिस्सं ।

(नेपथ्ये)

भो भोः पलादाः ! कथयत कथयत कथं वैदेही विपन्ना ? ।

माल्यवान् – दारुणिकाप्रपञ्चविप्रतारितः कोऽपि प्रलपति ? ।

(प्रविश्य सम्भ्रान्तः)

हनूमान् – देवि ! अलमलमतिसाहसेन । कष्टं भोः ! कष्टम्, कथमिदं रामभद्रस्यामङ्गलोचितमुपक्रान्तं देव्या ? । तदहं रणभूमिमुपसर्पामि । (इति निष्क्रान्तः ।)

(नेपथ्ये)

अक्षतस्यैव सौमित्रेश्चक्रं यत् करमागमत् ।
तज्जाने दशकण्ठस्य कण्ठच्छेद उपस्थितः ॥ २३ ॥

---

१) त्रिजटे ! एष तातो जनकः प्रलपति । हा दिव्य ! किमिदमुपस्थितम् ? । २) हा आर्यपुत्र ! हा त्रिभुवनैकमल्ल ! हा सुभग ! कुत्रासि ?, देहि मे प्रतिवचनम् । त्रिजटे ! अहं हुताशनमनुसरिष्यामि । ३) तात ! कस्माद् गत्वराणां प्राणानां कृते अनुचिते कर्मणि नियोजयसि ! । पतिदेवताः कुलपुत्रिकाः भवन्ति । तद् अहं हुताशनमनुसरिष्यामि ।

माल्यवान्—हा देव दशकन्धर! कामिमामश्रद्धेयामवस्थामाश्रितोऽसि ?।

शुकनासः—आर्य ! व्यक्तमयं भ्रातृवत्सलः कुमारो बिभीषणः प्रलपति ।

(आकाशे)

मध्येऽम्भोधि बभूव विंशतिभुजं रक्षो दशास्यं पुनः,
तत् पातालमही-त्रिविष्टपभटांश्चक्राम दोर्विक्रमैः ।
मर्त्यस्तस्य मृणालतन्तुतुलया चिच्छेद कण्ठाटवीं,
वैराग्यस्य च विस्मयस्य च पदं रामायणं वर्त्तते ॥ २४ ॥

त्रिजटा—भट्टिणि[1] ! अन्नारिसं किं पि विज्जाए वायाए सुणीयदि ? ।

सीता—मह[2] आसासणानिमित्तं निसायराणं खु एदं कवडं । (इति चिताभिमुखमुपसर्पति ।)

माल्यवन्तः—(साश्रम्)

क्व च स्वर्गाधीशस्मयविजयचञ्चुर्दशमुखः,
क्व च क्रीडाकारी शबरपृथुकाभ्यां परिभवः ।
न यो वाचः पात्रं भवति न दृशोर्नापि मनस-
स्तमप्यर्थं क्रुद्धो हतविधिरकाण्डे घटयति ॥ २५ ॥

सीता—(प्रदक्षिणीकृत्य) भयवं[3] हुयासण ! नमो दे ।

(नेपथ्ये)

मन्दं मन्दमयं जम्भविहितालम्बो हरिः शृङ्खला-
व्याजिह्मांह्रिरुपैति राघवमभि व्रीडानमत्कन्धरः ।
भूयोऽपि त्रिदिवं नयन्ति मुदिताः स्वःसिन्धुरोच्चैःश्रवः-
स्वर्गास्त्रा-ऽभ्रमु-कल्पपादप-निजप्रेयस्विनीः स्वर्गिणः ॥ २६ ॥

माल्यवन्तः—कथमयं दुरात्मा वनेचरः सीतामुपसर्पति ? । तदेहि शुकनाश ! प्रभुभक्तिसदृशमनुतिष्ठावः ।

(इति निष्क्रान्तौ ।)

(ततः प्रविशति हनूमदादिश्यमानमार्गो रामः लक्ष्मणः सुग्रीव - बिभीषण - जाम्बवदादिकश्च परिवारः ।)

रामः—(ससम्भ्रमम्) **हनूमन् ! किंनिमित्तमयममङ्गलाध्यवसायो देव्याः ? ।**

हनूमान्—**देव ! युष्मदादेशेन सीतास्वरूपविज्ञानायात्रागतवता तदिदममङ्गलमवलोकितम् । निमित्तं पुनर्नास्ति ज्ञातवान् ।**

---

१) भट्टिनि ! अन्यादृशं किमपि विद्याया वाचा श्रूयते । २) मम आश्वासनानिमित्तं निशाचराणां खलु एतत् कपटम् । ३) भगवन् हुताशन ! नमस्ते ।

रामः—(सानन्दम्) देवि ! सौमित्रिसूत्रितस्य दशकन्धरवधनाटकस्य कोऽयमद्भुतरसोचिते निर्वहणपर्वणि करुणरसोपक्रमः ? ।

सीता—(सव्रीड-रोमाञ्चमधोमुखीभूय स्वगतम्) दिट्ठिया[1] तेहिं य्येव लोयणेहिं अज्जउत्तो दिट्ठो । हियय ! समस्सस समस्सस । मणोरधा वि दे एत्तियं भूमिं न संपत्ता ।

बिभीषणः—(साक्षेपं जनकं प्रति) अरे सर्प ! कोऽयं प्रपञ्चः ? ।

जनकः—(सर्पकर्णरूपमास्थाय) देव ! रावणादिष्टेन माल्यवता प्रपञ्चमनुकारितोऽस्मि ।

बिभीषणः—(रामं प्रति) वैदेहीविपन्नप्रवादोऽपि रावणादिष्टेन कुन्देन वियति विहितः ।

रामः—ननु त्रिजटया समागत्य रावणाय देवीविपत्तिरावेदिता ।

बिभीषणः—त्रिजटावेषधारिणी दारुणिका तदिदमनुष्ठितवती ।

रामः—वीरव्रतानुचितः क्रव्यादमन्त्रिणामयं प्रपञ्चविप्लवः, न पुनर्दशग्रीवस्य ।

निर्माय प्रतिवीरविक्रमकथा[2]भव्यां त्रिलोकीमिमां,
वक्षश्चारकचारिणीं भगवतीं साम्राज्यलक्ष्मीं व्यधात् ।
स्त्रीहेतोश्च चकार सङ्गरमखे स्वैर्दक्षिणां मूर्द्धभिः,
सार्द्धं यः स पुनर्महार्घ्यमहिमा कोऽन्यो दशग्रीवतः ? ॥ २७ ॥

त्रिजटा—(रामं प्रति) एसा[3] दे पिया देवी सीदा अखण्डिदसीला विज्जदि, तदो जं ते पडिहाइ तं करेसु ।

रामः—(जाम्बवन्तं प्रति) अमात्य ! तर्हि स्वीकारमर्हति ।

जाम्बवन्तः—देव ! कः सन्देहः ? ।

रामः—(सविनय-रोमाञ्चं सीतां प्रति) ·

प्राणान् यद् विरहेऽप्यहं विधृतवान् देवि ! प्रियप्राणित-
स्तत् क्षन्तव्यमशेषमेष समयः स्मेराक्षि ! नैव क्रुधाम् ।
सौमित्रेः कपिभर्त्तुरस्य च मनःप्रीत्यै तदेहि प्रिये !,
हस्तिस्कन्धमलङ्कुरुष्व ननु ते पूर्णः प्रतिज्ञाविधिः ॥ २८ ॥

[सुग्रीवः—देव किं ते भूयः प्रियमुपकरोमि ? ।

रामः—किमतः परमपि मे प्रियमस्ति ?

---

१) दिष्ट्या तैरेव लोचनैः आर्यपुत्रः दृष्टः । हृदय ! समाश्वसिहि समाश्वसिहि । मनोरथा अपि ते एतावतीं भूमिं न सम्प्राप्ताः । २) °कथावन्ध्यां त्रि° उ० । ३) एषा ते प्रिया देवी सीता अखण्डितशीला विद्यते, ततो यत् तुभ्यं प्रतिभाति तत् कुरुष्व ।

जाम्बवन्तः – तथापीदमस्तु–

कल्याणं भूर्भुवः स्वः प्रसरतु, विपदः प्रक्षयं यान्तु सर्वाः,
सन्तः श्लाघां लभन्तामपचयमयतां दुर्मतिर्दुर्जनानाम् ।
धर्मः पुष्णातु वृद्धिं, प्रलयमनुकलं कल्मषाणि व्रजन्तु,
प्राप्य स्वातन्त्र्यलक्ष्मीमनुभवतु मुदं शाश्वतीं रामचन्द्रः ॥ २९ ॥

(इति निष्क्रान्ताः सर्वे ।)

॥ अष्टमोऽङ्कः ॥

॥ समाप्तमिदं रघुविलासं नाम नाटकम् ॥

॥ कृतिरियं प्रबन्धशतकर्तुर्महाकवेः श्रीरामचन्द्रस्य ॥]

